Funding: IKS/Native Heritage Digitization, Sarayu Trust/eGangotri

CC-0. Bhaskar Ramamrita Ethnal Research Institute Vedic Core Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

BZ

849

0·25

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

B7

849

0-25

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हरिदाससंस्कृतग्रन्थमालासम्राख्य-
काशीसंस्कृतसीरिज़पुस्तकमालायाः

९

कामशास्त्रविभागे (१) प्रथमपुष्पम् ।

अनङ्गरङ्गः

महाकविकल्याणमल्लविरचितः ।

नेपालदेशीय—

विष्णुप्रसादभण्डारिणा
संशोधितः ।

काशीस्थ—
चौखम्बासंस्कृतपुस्तकालयस्वामिनाश्रेष्ठिकुलभूषण-
हरिदासगुप्तात्मजेन जयकृष्णदासगुप्तमहोदयेन
विद्याविलासनाम्नि यन्त्रालये
मुद्रयित्वा प्रकाशितम् ।
सन् १९२३

Registered According to Act XXV. of 1867.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़पुस्तकमालायाः

९

कामशास्त्रविभागे (१) प्रथमपुष्पम् ।

अनङ्गरङ्गः

महाकविकल्याणमल्लविरचितः ।

नेपालदेशीय—
विष्णुप्रसादभण्डारिणा
संशोधितः ।

Registered According to Act XXV. of 1867.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

PRINTED BY JAYKRISHNA DASS GUPTA
at the Vidya Vilash Press, Benares.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भूमिका ।

सुविदितमिदं तावत् प्रेक्षावतां समुपादेयेषु चतुर्षु पुरुषार्थेषु कामाभिधस्तृतीयः पुरुषार्थ इति । यो विरक्तजनमपहाय प्रायः सर्वेषामभिगम्यः ।

तत्प्रतिपादकमेव तन्त्रं कामशास्त्रमित्युच्यते ।

समीचीनं सांसारिकसुखमनुबुभूषतां गार्हस्थ्यं शोभनं चिकीर्षूणां सम्भोगादिषु पशुप्रायतामपाचिकीर्षूणां ललनाजनेषु पाटवमभिलाषुकाणामवश्यमुपादेयमिदमिति नापरोक्षं विदुषाम् ।

स्त्रीपुरुषयोः स्वरूप–व्यवहार–वर्तनादिप्रदर्शनेन दुर्व्यसनतो निवर्तनतात्पर्यपरे शोभनदाम्पत्यनिदर्शके सूपयोगिनैकविधमन्त्रौषधनिरूपकेऽत्राश्लीलतादिदोषोद्भावनेनानुपादेयत्वमभिदधत्सु बाह्यप्रायेषु गजनिमीलिकैव विधेया सद्भिर्विवेकशालिभिः ।

तस्य च निबन्धारो नन्दीश्वर-श्वेत केतु-बाभ्रव्य-दत्तक-वात्स्यायनादयः प्राचीना महर्षयः । साम्प्रतं यद्यपि तन्निबन्धाः सामस्त्येन न समुपलभ्यन्ते । ये च पञ्चषाः समुपलभ्यन्ते तेऽपि अयथातथाभूता दुरूहाश्च । तेषु वात्स्यायनमहर्षिप्रणीतं कामसूत्रं सटीकं, कोक्कोकविकृतं रतिरहस्यं, कुचुमारतन्त्रं, पञ्चसायकमित्यादीनि ग्रन्थरत्नानि मुद्रितानि प्राप्यन्ते ।

तत्र वात्स्यायन–कामसूत्राद्यनुसारी परिस्फुटार्थप्रदर्शकः सङ्क्षिप्तोऽयं निबन्धः 'अनङ्गरङ्ग' इति । कामसूत्रादौ विस्तरतः प्रोक्तान्यर्थजातानि समासेन सरलतया चात्र तथा प्रतिपादितानि यथा सुकुमारमतयोऽप्यञ्जसा समवबोद्धुं पारयन्ति इति ग्रन्थपर्यालोचनसमये स्वयमेव व्यक्तीभविष्यति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अस्य च प्रणेता लोदीवंशोत्पन्नाहमदभूपालतनुजन्मनो लाडखाननृपतेराश्रितः कर्पूरवंशयित्रैलोक्यचन्द्रनृपात्मजगजमल्लतनूजः कल्याणमल्लनामा कविः। एतच्च ग्रन्थकर्त्रा ग्रन्थादौ "लोदीवंशावतंस" इत्यादिपद्यैः स्वयमेव प्रतिपादितम्। अतोऽधिकमदसीयसमयादीतिवृत्तं न किमप्यासादितम्। लोदीवंशश्च गुर्जरेषु प्रसिद्ध इति सम्भाव्यते प्रायो गुर्जरः स्यादयं कविरिति।

मुद्रितस्याप्यनतिशुद्धत्वात्कोष्ठकादिशून्यत्वाच्च पुनर्मुद्रणारम्भः।

मुद्रणोपक्रमेऽस्य आदर्शपुस्तकानि चत्वारि समुपलब्धानि।

नानाविधग्रन्थरत्नसङ्ग्रहकर्तृवर्यश्रीबाबुगोविन्ददासमहाशयसकाशात् शुद्धप्रायं सम्पूर्णं लिखितमेकम्।

मत्सन्निधिस्थं नातिशुद्धं लिखितं सम्पूर्णमपरम्।

लोहौरनगरमुद्रितं तृतीयम्।

कुतश्चन समासादितं नातिशुद्धमपूर्णं तुरीयम्।

एषु च बाबुगोविन्ददासपुस्तकस्याधारेणैव मुद्रितोऽयम्।

तत्र तत्र चन्द्रकलादिबोधककोष्ठकानि, विषयसूचीं, पारिभाषिकशब्दसूचीं, शुद्धिपत्रं च निवेश्य कामसूत्र—रतिरहस्ये अवलम्ब्य लघुटिप्पणीयोजनेनापि परिष्कृत्य समशोधयमसुं श्रीजयकृष्णदासगुप्तमहाशयाभ्यर्थितः।

तदेवं सप्रयासं परिशोधितेऽपि मानुषस्वभावमनुसरन्ति स्खलितानि मर्षयिष्यन्ति गुणैकगृह्या विपश्चिदपाश्चिमा इति

१९८० अधिकज्येष्ठ-
कृष्णे ३ शनौ

निवेदयते—
नेपालाभिजनः
विष्णुप्रसादभण्डारी।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अनङ्गरङ्गस्य विषयसूची ।

(प्रथमस्थले)

विषयाः	पृष्ठे	पङ्क्तौ
मङ्गलाचरणम्	१	१
लाडखाननृपवर्णनम्	,,	५
ग्रन्थकरणे तत्प्रेरणम्	,,	९
निजवंशकथनम्	,,	११
पद्मिनीस्वरूपनिरूपणम्	३	६
चित्रिणीलक्षणानि	,,	१५
शंखिनीलक्षणानि	४	६
हस्तिनीलक्षणानि	,,	१५
पद्मिनीप्रभृतीनां सुखतिथयः	५	२

(द्वितीयस्थले)

पद्मिन्यादीनां साधारणी चन्द्रकला	५	१६
पद्मिन्याश्चन्द्रकला	६	१२
चित्रिण्याश्चन्द्रकला	७	१२
समरतम्	१०	६
उच्चरतम्	,,	८
नीचरतम्	,,	९
अत्युच्चरतम्	,,	१०
अतिनीचरतम्	,,	११
शंखिन्याश्चन्द्रकला	८	१०
हस्तिन्याश्चन्द्रकला	९	६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(तृतीयस्थले)

विषयाः	पृष्ठे	पङ्क्तौ
मदनाङ्कुशकामातपत्रयोर्दैर्घ्यगाम्भीर्याभ्यां पुरुषाणां शशादिसंज्ञा स्त्रीणां मृग्यादिसंज्ञा	१०	२
उत्तमादिरतम्	,,	१२
स्त्रिया नीचसम्भोगेन न तृप्तिः	,,	१७
कण्डूतिजनकाः कीटाः	,,	१४
कण्डूतिशमनपूर्वकद्रावणेनैव स्त्रिया वशीकारः	,,	१८
क्षरणेन स्त्रीणां सुखं भवति तत्स्वरूपम्	११	४
त्रिविधा विसृष्टिः	,,	८
त्रिधा वेगः	,,	१०
प्रचण्डादिवेगस्वरूपम्	,,	१४
शशस्वरूपनिरूपणम्	,,	१७
वृषभलक्षणानि	१२	२
अश्वलक्षणानि	,,	७
मृगीलक्षणानि	,,	१६
वडवालक्षणानि	१३	६
करिणीलक्षणानि	,,	१५

(चतुर्थस्थले)

स्त्रीणां वयोधर्मानुसारं बालादिसंज्ञा	१४	८
बालादीनां रञ्जनोपायाः	,,	१२
वियोगयोगयोरङ्गनानां स्वरूपम्	१५	१
स्त्रीणां प्रकृतिभेदेनोत्तमत्वादि	,,	६
प्रकृतिलक्षणानि	,,	६
देवसत्त्वादयः	१६	१

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विषयाः	पृष्ठम्	पङ्क्तौ
स्त्रीणां नाशहेतवः	१७	१२
स्त्रीणां वैराग्यहेतवः	,,	१७
विरक्तालक्षणानि	१८	४
प्रीतेर्विभागस्तल्लक्षणानि च	,,	९
भोजनादिव्यवस्था	१९	६
योनिस्वरूपम्	,,	९
अल्पसाध्याः	२०	६
रताभिलाषचिन्हानि	,,	१४
(पञ्चमस्थले)		
वनितानां देशधर्म्माः	२१	७
(षष्ठस्थले)		
द्रावणादियोगाः	२६	२
स्तम्भनाधिकारः	२७	१२
वाजीकरणम्	२८	१२
लिङ्गस्थूलीकरणम्	३०	५
भगसंकोचनम्	३१	८
योनिसंस्कारः	३२	९
लोमशातनम्	,,	१४
नष्टपुष्पसमुद्भवः	३३	३
पुष्पाधिक्यनिवारणम्	,,	८
गर्भाधानविधिः	,,	१३
गर्भस्तम्भनम्	३४	१४
सुखप्रसवविधिः	३५	५
वंध्यात्वापादनम्	,,	१६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विषयाः	पृष्ठे	पङ्क्तौ
केशोद्भवरञ्जनविधिः	३६	७
केशश्वेतीकरणम्	३७	११
मुखकण्टकहरणम्	,,	१६
मुखनीलीहरणम्	३८	४
कुचसंस्कारः	,,	९

(सप्तमस्थले)

वशीकरणादिनिरूपणम्	३९	८
तिलकविधिः	,,	१२
अञ्जनविधिः	४०	८
चूर्णविधिः	४१	३
वटिकाभक्षणविधिः	,,	१०
लेपविधिः	,,	१७
धूपः	४२	१०
कामेश्वरमंत्रः	४३	२
चामुण्डामंत्रः	,,	९
पद्मिनीवशीकरणम्	,,	१६
चित्रिणीवशीकरणम्	४४	३
शंखिनीवशीकरणम्	,,	१०
हस्तिनीवशीकरणम्	,,	१५
अंगरागादिनिरूपणम्	४५	३
सुगन्धितैलप्रयोगः	४६	३
स्नानीयसुगंधिः	,,	८
सामान्यसुगन्धिप्रयोगः	,,	१३
सर्वोत्तमसुगंधिप्रयोगः	४७	४

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

•Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विषयाः	पृष्ठे	पङ्क्तौ
सुखवासविधिः	४८	१
(अष्टमस्थले)		
विवाहाद्युपदेशः	४८	१८
कन्याशुभलक्षणानि	४९	४
कन्यादुष्टलक्षणानि	,,	१३
जामातृसल्लक्षणानि	५०	९
जामातृदूषणानि	,,	१६
पुरुषसामुद्रिकलक्षणनिरूपणम्	५१	३
स्त्रीसामुद्रिकलक्षणनिरूपणम्	५२	९
परस्त्रीगमननिषेधः	५४	४
कारणवशात्परस्त्रीगमनस्यानघत्वनिरूपणम्	,,	१
अगम्याः स्त्रियः	५५	१२
दूत्यः	,,	१८
सुखसाध्यालक्षणानि	५६	३
अनुरागिणीलक्षणानि	,,	८
दुःसाध्यालक्षणानि	५७	४
सुरते त्याज्यस्थानानि	,,	१०
सुरते विहितप्रदेशाः	,,	१५
(नवमस्थले)		
बाह्यसंभोगविधानम्	५८	१
परिरंभलक्षणानि	,,	६
चुम्बनभेदाः	६०	७
नखदानविधानम्	६२	९
दशनविधानम्	६४	३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

विषयाः	पृष्ठे	पङ्क्तौ
केशग्रहणोद्देशः	६५	३
(दशमस्थले)		
सुरतभेदनिरूपरणम्	६६	१
उत्तानबन्धाः	,,	९
तिर्यग्बन्धाः	६९	३
उपविष्टबन्धाः	,,	१०
स्थितबन्धाः	७०	१०
व्यानतबन्धाः	,,	१७
पुरुषायितबन्धाः	७१	६
करताडनसीत्कृतादिनिरूपणम्	७३	१२
ताडनभेदाः	७३	१९
अष्टनायिकालक्षणानि	५	१
उपसंहारः	७६	१३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अनङ्गरङ्गस्थपारिभाषिकशब्दाना

सूची ।

	पृ०	पं०
पद्मिनी	३	३
चित्रिणी	,,	,,
शङ्खिनी	,,	,,
हस्तिनी	,,	,,
कामसलिलम्	,,	८
कामाम्भः	,,	१८
कामागारम्	४	१
रत्यम्बु	,,	२
स्मरजलम्	,,	८
रतिजं तोयम्	,,	१७
नलिनी	५	६
छुरितकम्	७	५
चन्द्रकला	,,	६
मन्मथमन्दिरम्	,,	१७
करिकरः	,,	,,
स्मरवारि	,,	१८
चित्रप्रिया	,,	,,
मदनागारम्	८	१
मन्मथजलम्	,,	४
अनङ्गजलम्	,,	१३
मदनालयः	,,	१६
मदनसदनम्	९	६
[illegible]ी	,,	९
स्मरालयः	,,	११
द्विपाङ्गना	,,	१३
मदनाङ्कुशः	१०	२
हरिणः	,,	४
शशः	,,	,,
वृषभः	,,	,,
अश्वः	,,	,,
मृगी	,,	५
अश्वी	,,	,,
द्विरदाङ्गना	,,	,,
वृषः	,,	६
तुरङ्गः	,,	,,
हरिणी	,,	८
अश्विका	,,	,,
तुरगः	,,	,,
तुरगी	,,	९
कुसुमेषुजलम्	११	४
विसृष्टिः	,,	८
मदनस्यन्दः	,,	२०
कामालयः	१२	१८
कन्दर्पनीरम्	१३	२०
मदनावासा	१४	१
मन्मथच्छत्रम्	१९	१७
पूर्णचन्द्रा	२०	१
मनोजवारि	,,	२
कन्दर्पयुद्धम्	,,	९
द्रवः	२२	३

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

	पृ०	पं०
ध्वजः	,,	१०
विषमविशिखयुद्धम्	२३	३
नखदानम्	,,	५
रतिरङ्गः	२४	६
स्मरसमरविलासः	२७	९
वृक्षाधिरूढम्	५८	१०
तिलतण्डुलम्	,,	१२
लालाटिकम्	५९	१
जाघनम्	,,	५
विद्धकम्	,,	८
ऊरूपगूढम्	,,	१३
क्षीरनीरम्	६०	१
वल्लरिवेष्टितम्	,,	५
मिलितम्	६१	४
स्फुरितम्	,,	६
वन्दिका	,,	१०
तिर्यक्	,,	१३
उत्तरोष्ठम्	,,	१६
पीडितकम्	६२	१
सम्पुटकम्	,,	३
प्रतिबोधम्	,,	५
समौष्ठम्	,,	७
छुरितम्	६३	१
अर्धचन्द्रः	,,	३
मण्डलकम्	,,	५
मयूरपादः	,,	११
शशप्लुतम्	,,	,,
उत्पलपत्रम्	,,	१२
गूढकम्	६४	९
उच्छूनकम्	,,	१०
प्रवालमणिः	,,	११

	पृ०	पं०
बिन्दुमालकः	,,	१४
खण्डाभ्रकम्	,,	१५
कोलचर्वम्	६५	१
समहस्तकम्	,,	८
तरङ्गरङ्गकम्	,,	,,
भुजङ्गवल्लिकम्	,,	१०
कामावतंसः	,,	१२
उत्तानकम्	६६	६
तिर्यक्	,,	,,
आसितम्	,,	,,
स्थितम्	,,	,,
आनतकम्	,,	,,
समपादः	,,	११
नागरः	,,	१६
त्रैविक्रमः	६७	४
व्योमपदः	,,	८
स्मरचक्रम्	,,	११
अवतारितम्	,,	१६
सौम्यः	६८	४
जृम्भितम्	,,	८
वेष्टितम्	,,	११
वेणुविदारितम्	,,	१६
उद्भ्रमकम्	,,	१९
स्फुटनम्	६९	१
वीणकम्	,,	४
सम्पुटम्	,,	६
कर्कटः	,,	८
पद्मासनम्	,,	११
उपपदम्	,,	,,
बन्धुरितम्	,,	१५
फणिपाशः	,,	१७

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

	पृ०	पं०
संयमनम्	७०	२
कौर्मकम्	,,	४
परिवर्तितम्	,,	,,
युग्मपदम्	,,	६
वितर्दितम्	,,	८
मार्कटकम्	,,	,,
कूर्परः	,,	११
हरिविक्रमः	,,	१३
कीर्तिबन्धः	,,	१५
धेनुकम्	,,	१८
ऐभम्	७१	२
ऐणम्	,,	३
गार्दभम्	,,	,,
सौकरकम्	,,	,,
पुरुषायितम्	,,	७
विपरीतबन्धः	,,	९
भ्रामरम्	,,	११
उत्कलितम्	,,	१३
सम्पुटम्	७२	१४
करताडनम्	७३	१३
प्रसृतकम्	,,	१८
अपहस्तकम्	,,	,,
करघातनकम्	७४	१
सन्तानितम्	,,	,,
सपताकम्	,,	३
बिन्दुमालः	,,	५
कुण्डलम्	,,	७
हिंकृतम्	,,	९
उत्कृतम्	,,	,,
फूत्कृतम्	,,	,,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अनङ्गरङ्गस्य शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ०	पं०
ग्रीवा	ग्रीवां	८	३
प्रिया	प्रियां	"	७
बाहुभ्या	बाहुभ्यां	"	१०
मृगादि	मृग्यादि	१०	१
प्रतिस्थूल	प्रस्थूल	१३	१४
कराङघ्रि	कराङ्घ्रि	"	१६
यावन्नवत् ॥	यावन्नवेत् ॥	१४	९

षोडशे पृष्ठे १।२।३।४।५। अङ्केषु ११।१२।१३।१४।१५। एते अङ्का बोध्याः ।

कर्पूर	कर्पूरं	२६	१६
रागा	रागां	२७	१०
समाशकम् ।	समांशकम् ।	२८	२
वटिका	वटिकां	२९	५
दृढता	दृढतां	३२	७
क्रमैणव	क्रमेणैव	३७	७
चौभः समर्धू	चैभिः समैर्धू	४२	१५
टि० ५ उशरीरम्	उशीरम्	४७	१९
टि० १ स्तस्मल्लक्षण	स्तस्माल्लक्षण	५४	१४
कल्याणामल्ल	कल्याणमल्ल	५७	१९

६३ पृष्ठे २४ श्लोकस्य पूर्वार्धम्—

अव्यक्तरेखं कृतरोमहर्षं समर्पितं गण्डकुचाधरेषु ॥

॥ इति ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

❀ श्रीः ❀

श्रीगणेशाय नमः ॥

अथ अनङ्गरङ्गः प्रारभ्यते ।

अतिललितविलासं विश्वचेतोनिवासं
समरकृतविकाशं शम्बराख्यप्रणाशम् ॥
रतिनयनविरामं सन्ततं चाभिरामं
प्रसभविजितवामं शर्मदं नौमि कामम् ॥ १ ॥

लोदीवंशावतंसो हतरिपुवनितानेत्रवारिप्रपूर-
प्रादुर्भूतासु सिन्धुष्वमितवरयशा लीलया प्लावितारिः ॥
सत्पुत्रः ख्यातकीर्त्तेरहमदनृपतेः कामसिद्धान्तविद्वान्
जीयाच्छ्रीलाडखानः क्षितिपतिमुकुटैर्घृष्टपादारविन्दः॥२॥

तस्य भूरिगुणरत्नतोयधेः प्रेमपूर्ववचनानुरोधतः ॥
कौतुकाय रसिकानुरञ्जनं शास्त्रमुत्तममिदं विरच्यते ॥३॥

अम्भोजिनीबन्धुकुलप्रसूतः
कर्पूरराजन्य उदारकीर्तिः ॥
तीव्रप्रतापानलदग्धशत्रुः
त्रैलोक्यचन्द्रः क्षितिपाल आसीत ॥ ४ ॥

---

१ ष्वमितजयतया इति पुस्तकान्तरे पाठः ।

क

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तस्यात्मजोऽस्ति गजमल्ल इति प्रसिद्धः
सङ्ग्रामसङ्गतपराजितवैरिवृन्दः ॥
क्षान्त्याद्यशेषशुभलक्षणसन्निवासः
चन्द्रांशुनिर्मलयशोरुचिरीकृताशः ॥ ५ ॥
पुत्रोऽस्य तस्य कुतुकार्थमनङ्गरङ्गं
ग्रन्थं विलासिजनवल्लभमातनोति ॥
श्रीमान्महाकविरशेषकलाविदग्धः
कल्याणमल्ल इति भूपमुनिर्यशस्वी ॥ ६ ॥
मतानि दृष्ट्वा बहुशो मुनीनां
तत्सारमादाय निरूपयामि ॥
अतोऽङ्गनाकेलिकलानुरागै-
र्ग्राह्यः सदाऽयं पुरुषैः सभावम् ॥ ७ ॥
निःसारे जगति प्रपञ्चसदृशे सारं कुरङ्गीदृशा-
मेकं भोगसुखं परात्मपरमानन्देन तुल्यं विदुः ॥
तज्जात्यादिविवेकमूढमनसो लब्ध्वापि नानाङ्गनाः
संविन्दन्ति न कामतन्त्रविकलाः पश्वादिवन्मानवाः॥८॥
सुविदितपरमार्थः कामशास्त्रस्य विद्वान्
त्रिविधरतिविनोदैः कामिनीनां मनांसि ॥

१ अस्यैव कौतुकनिमित्तमनङ्ग–इति पुस्तकान्तरे पा० । तस्यैव सूनुरतिमञ्जुमनङ्गेत्यपि क्वचित्पाठः । २ लाडखाननृपतेः ।
३ सादरम् । ४ इदं पद्यं पुस्तकान्तरे नास्ति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अनुदिनमनुरागाद्रञ्जयेद्यः सलीलं
फलमविकलमेव प्राप्नुयान्मानवः सः ॥ ९ ॥
पद्मिनी चित्रिणी चाथ शङ्खिनी हस्तिनी ततः ॥
क्रमाच्चतुर्द्धा नारीणां लक्षणानि ब्रुवेऽधुना ॥ १० ॥

तत्र तावत्पद्मिनीस्वरूपं निरूप्यते—

प्रान्तारक्तकुरङ्गशावनयना पूर्णेन्दुतुल्यानना
पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा ॥
फुल्लाम्भोजसुगन्धिकामसलिला लज्जावती मानिनी
श्यामा कापि सुवर्णचम्पकनिभा देवादिपूजारता ॥ ११ ॥
उन्निद्राम्बुजकोशतुल्यमदनच्छत्रा मरालस्वना
तन्वी हंसवधूगतिः सुललितं वेषं सदा बिभ्रती ॥
मध्यं चापि वलित्रयाङ्कितमसौ शुक्लाम्बराकाङ्क्षिणी
सुग्रीवा शुभनासिकेति गदिता नार्युत्तमा पद्मिनी ॥ १२ ॥

अथ चित्रिणीलक्षणानि—

तन्वङ्गी गजगामिनी चपलदृक्सङ्गीतशिल्पान्विता
नो ह्रस्वा न बृहत्तराथ सुकृशा मध्ये मयूरस्वना।
पीनश्रोणिपयोधरा सुललिते जङ्घे वहन्ती कृशे
कामाम्भो मधुगन्ध्यथौष्ठमपि सा तुच्छोन्नतं वत्सला ॥ १३ ॥

---

१ पूर्वपूर्वतरैतासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे। इति पुस्तकान्तरे।
२ मदनच्छत्रं योनिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कामागारमसान्द्रलोमसहितं[1] मध्ये मृदु प्रायशो
बिभ्रत्युल्लसितं च वर्त्तुलमथो रत्यम्बुनाढ्यं सदा ॥
भृङ्गीश्यामलकुन्तलाथ जलजग्रीवोपभोगे रता
चित्राशक्तिमती रतेऽल्परुचिका ज्ञेयाङ्गना चित्रिणी ॥ १४ ॥

अथ शङ्खिनीलक्षणानि—

दीर्घं बाह्याशिरं[2] कृशं[3] पृथुमथो देहं वहन्ती तथा
पादौ दीर्घतरौ कटिं च बृहतीं स्वल्पस्तनी कोपिनी ॥
गुह्यं क्षारविगन्धिना स्मरजलेनाल्पेन सान्द्रैः कचै-
रानिम्नं, कुटिलेक्षणा द्रुतगतिः सन्तप्तगात्रा भृशम् ॥ १५ ॥
सम्भोगे करजक्षतानि बहुशो यच्छत्यनङ्गाकुला
न स्तोकं न च भूरि भक्षति सदा प्रायो भवेत् पित्तला ॥
स्रग्वस्त्राण्यरुणानि वाञ्छति दयाहीना च पैशून्यभृ-
त्पिङ्गा दुष्टमनाश्च घर्घरमहारूक्षस्वरा शङ्खिनी ॥ १६ ॥

अथ हस्तिनीलक्षणानि—

स्थूला पिङ्गलकुन्तला च बहुभुक् क्रूरा त्रपावर्जिता
गौराङ्गी कुटिलाङ्गुलीकचरणा ह्रस्वानमत्कन्धरा ॥
बिभ्रत्यैभमदाम्बुगन्धि रतिजं तोयं भृशं मन्दगा
दुःसाध्या सुरतेऽतिगह्वरदरत्वा स्थूलौष्ठिका हस्तिनी ॥ १७ ॥

---

१ कामागारं भगः । २ बाह्या प्रकटा शिरा नाडी यस्मिन् ।
३ द्वयमपि देहविशेषणम् । तथाच क्वचित् कृशता क्वचित्स्थूलतेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १)

स्त्रीणां सुखतिथिविषयककोष्ठम् ।

१	२	४	५	आसु तिथिषु पद्मिन्याः सम्भोगेच्छा जायते.
६	८	१०	१२	आसु तिथिषु चित्रिण्याः सम्भोगेच्छा जायते.
३	७	११	१३	आसु तिथिषु शङ्खिन्याः सम्भोगेच्छा जायते.
९	१४	१५	३०	आसु तिथिषु हस्तिन्याः सम्भोगेच्छा जायते.

CC-0: Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या २)

दिवससम्भोगेच्छाविषयककोष्ठम् ।

	१ प्रहरे	२ प्रहरे	३ प्रहरे	४ प्रहरे
पद्मिन्याः	भोगेच्छा	भोगेच्छा	भोगेच्छा	भोगेच्छा
चित्रिण्याः	०	०	०	०
शंखिन्याः	०	०	०	०
हस्तिन्याः	०	०	भोगेच्छा	भोगेच्छा

(चित्र संख्या ३)

रात्रिसम्भोगेच्छाविषयककोष्ठम् ।

	१ प्रहरे	२ प्रहरे	३ प्रहरे	४ प्रहरे
पद्मिन्याः	०	०	०	भोगेच्छा
चित्रिण्याः	भोगेच्छा	०	०	०
शंखिन्याः	भोगेच्छा	०	भोगेच्छा	०
हस्तिन्याः	भोगेच्छा	भोगेच्छा	भोगेच्छा	भोगेच्छा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ पद्मिनीप्रभृतीनां सुखतिथय उच्यन्ते—

वेदाक्षीन्दुशरैप्रसङ्ख्यतिथयः प्रोक्ता नलिन्या रते-
र्वस्वादित्यदशर्त्तुसङ्ख्यतिथिषु प्रीता भवेच्चित्रिणी ॥
रुद्राम्भोधिगुणासमेषुतिथिषु प्रायो द्रवेच्छङ्खिनी
राकादर्शचतुर्दशीग्रहमितास्वेति द्रवं हस्तिनी ॥ १८ ॥

रात्रेश्चतुर्थचरणे नलिनी द्रवत्वं
संयाति चित्रदयिता प्रथमे च यामे ॥
प्रीत्यै तृतीयचरणः खलु शङ्खिनीनां
नक्तन्दिनार्द्धमपि हस्तिवधूजनानाम् ॥ १९ ॥

रजनीसुरतेषु पद्मिनी न सुखं याति निसर्गतः क्वचित् ॥
दिवसे शिशुयोगतोऽपि सा विकसत्यम्बुजिनी यथा रवेः २० ॥

इति श्रीलाडखानविनोदाय महाकविकल्याणमल्ल-
विरचिते अनङ्गरङ्गे पद्मिन्यादिस्वरूपानि-
रूपणं नाम प्रथमं स्थलम् ।

अथ पद्मिनीप्रभृतीनां साधारणी चन्द्रकला निरूप्यते ।

सीमन्ताक्ष्यधरे कपोलगलके कक्षाकुचोरःस्थले
नाभिश्रोणिवराङ्गजानुविषये गुल्फे पदेऽङ्गुष्ठके ॥
कृष्णाकृष्णविभागतो मनसिजस्तिष्ठेत्क्रमात् योषितां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

वामाङ्गेष्वध ऊर्ध्वतोऽभिगमनान्मासस्य पक्षद्वये ॥ १ ॥
सीमन्ते करजं ददीत, नयने गण्डेऽपि संचुम्बनं,
दन्तेनाधरखण्डनं च, नखरैः कक्षां सकण्ठां लिखेत् ॥
श्रोणीं चाथ कुचं करेण सुदृढं गृह्णीत नाभौ पुनः
सन्दद्याच्च चपेटकं, स्मरगृहे मातङ्गलीलायितम् ॥२॥
कुर्याद्वक्षसि ताडनं तु शनकैर्मुष्ट्या सकृद्बुद्धिमान्
जान्वङ्गुष्ठपदेषु गुल्फविषये तैरात्मनो घातनम् ।
इत्थं चन्द्रकलाप्रदीपनविदो रागान्विता भोगिनो
नीत्वा स्वीयवशं कुरङ्गनयनां विन्दन्ति सौख्यं परम्॥ ३॥

अथ तासामेव पृथक्तया शशिकलोच्यते ।

तत्रादौ पद्मिन्याश्चन्द्रकला—

कण्ठे संश्लिष्य गाढं, मृदु करजचयं गण्डपाल्यां नितम्बे
पृष्ठे पार्श्वोदरे वा विदधदथ रदैः खण्डयन्दन्तवासः ॥
प्रेम्णा चुम्बन् ललाटं, वपुषि च जनयन् रोमहर्षं नितान्तं
सीत्कारप्रायवक्त्रां प्रतिपदि नलिनीं द्रावयेन्नो विदग्धः ॥४॥
सञ्चुम्ब्य दन्तवसनं, जघने कपोले
पादद्वये स्तनयुगे च नखानि दत्त्वा ॥

१ कृष्णपक्षे प्रतिपत्प्रभृतितोऽमावास्यापर्यन्तं वामाङ्गे सीमन्तमारभ्याङ्गुष्ठपर्यन्तं, शुक्लपक्षे प्रतिपत्प्रभृतितः पूर्णिमान्तं दक्षिणपादाङ्गुष्ठात्सीमन्तपर्यन्तं तत्तत्स्थानेषु मदनवासं जानीयात् इत्याशयः। एतच्च अन्ते प्रदर्शितकोष्ठकाद्व्यक्ततरं भविष्यति । २ ना पुरुषः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

(चित्र संख्या ४)

स्त्रीणां कामपरिपूर्णविषयविवरणम् ।

शुक्लपक्षे तिथयः	दक्षाङ्गे स्थानानि	कामपूर्णभवनरीतिः	वामाङ्गे स्थानानि	कृष्णपक्षे तिथयः
१५	केशमस्तकयोः	केशं धृत्वाऽङ्गुल्या घट्टयेत्	केशमस्तकयोः	१
१४	दक्षिणनेत्रे ...	चुम्बनं कुर्यात्	वामनेत्रे ...	२
१३	अधरोष्ठे ...	चुम्बनं कृत्वा मन्दंमन्दमधरं दशेत्	ओष्ठे ...	३
१२	दक्षकपोले ...	चुम्बनं कुर्यात्	वा० कपोले ...	४
११	द० कण्ठे ...	नखैर्विलिखेत्	कण्ठे ...	५
१०	द० बाहुमूले ...	नखैर्लेखनं कुर्यात्	वा० बाहुमूले ...	६
९	द० स्तने ...	करेण गाढं पीडयेत्	वा० स्तने ...	७
८	उरसि ...	मुष्ट्या शनैस्ताडयेत्	उरसि ...	८
७	नाभौ ...	चपेटां दद्यात्	नाभौ ...	९
६	द० श्रोणौ ...	हस्तेन दृढं ग्रहणम्	वा० श्रोणौ ...	१०
५	योन्याम् ...	शिश्नं प्रवेश्य घर्षयेत्	योन्याम् ...	११
४	द० जानुनि ...	स्वजानुघट्टनं कुर्यात्	वा० जानुनि ...	१२
३	द० गुल्फे ...	निजगुल्फेन घट्टनं विदधीत	वा० गुल्फे ...	१३
२	द० चरणे ...	स्वकीयपदा घट्टनं कुर्यात्	वा० चरणे ...	१४
१	द० पादाङ्गुष्ठे ...	निजाङ्गुष्ठेन घट्टनं कुर्यात्	वा० पादाङ्गुष्ठे	३०

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या ५)

पद्मिन्याश्चन्द्रकलाबोधककोष्ठकम् ।

स्थानानि	कण्ठे	कपोले	नितम्बे	पृष्ठे	पार्श्वे	अधरे	ललाटे	शरीरे	जघने	चरणयोः	स्तनयोः	ऊरुफलके	कक्षायाम्	चूचुकयुग्मे	केशेषु
१ प्रतिपदि	गाढालिङ्गनम्	कोमलनखक्षतदानम्	मृदुनखक्षतदानम्	मृदुनखक्षतदानम्	मृदुनखक्षतदानम्	दशनम्	चुम्बनम्	रोमाञ्चोत्पादनम्	०	०	०	०	०	०	०
२ द्वितीयायाम्	०	चुम्बनम्	०	०	०	चुम्बनम्	०	०	नखैर्विलेखनम्	नखैर्विलेखनम्	नखैर्विलेखनम्	०	०	०	०
४ चतुर्थ्याम्	०	०	०	०	०	दन्तैः खण्डनम्	०	०	०	सम्मर्दनम्	सम्मर्दनम्	नखैर्विलेखनम्	छुरिताख्य नखक्षत०		
५ पञ्चम्याम्	०	०	०	०	०	दशनैः खण्डनम्	०	०	०	०	विमर्दनम्	०	०	प्रेमपूर्वकं ग्रहणम्	दक्षकरेणाकर्षणम्

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

(चित्र संख्या ६)

चित्रिण्याश्चन्द्रकलाबोधककोष्ठकम् ।

स्थानानि	योनौ	अधरोष्ठे	कण्ठे	नितंबे	नाभौ	ओष्ठे	स्तनयोः	कर्णे	ऊर्वोः	पृष्ठे	कट्यां	गण्डे	ललाटे	नेत्रयोः	चिकुरेषु
६ षष्ठ्याम्	०	चुम्बनम्	आलिङ्गनम्	नखैर्विलेखनं	०	०	०	०	०	०	०	०	०	०	०
८ अष्टम्याम्	अङ्गुल्या घट्टनम्	०	बाहुभ्यां परिरम्भणम्	०	नखैर्लेखनम्	दन्तैः खण्डनम्	मर्दनम्	०	०	०	०	०	०	०	०
१० दशम्याम्	वामकरेणालोडनम्	०	नखैर्विलेखनम्	०	०	०	मध्येवामहस्तेनालोडनम्	वामकरेणसमालोडनम्	वामहस्तनालोडनम्	वामहस्तेनालोडनम्	वामहस्तेनालोडनम्	०	चुम्बनम्	०	०
१२ द्वादश्याम्	०	दन्तैः खण्डनम्	गाढालिङ्गनम्	०	०	०	०	नखदानम्	०	०	नखदानम्	चुम्बनम्	०	निमेषकरणम्	कर्षणम्

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रायः प्रबुद्धमदनां युगलाख्यतिथ्यां
कामी नयेत द्रवदशां नलिनीं सहर्षाम् ॥ ५ ॥
गाढालिङ्गनपूर्वकं कुचयुगं सम्पीड्य दन्तच्छदं
दष्ट्वा चाशु रदैरथोरुफलके यच्छन्नखानादरात् ॥
दोर्मूले सहसाऽसकृच्छुरितकं कुर्वंश्चतुर्थ्यां तिथौ
कामं सम्प्रतिबोध्य चन्द्रकलया कुर्य्यान्निजां पद्मिनीम्॥६॥
दष्ट्वाधरं तदनु पीनकुचौ विमर्द्य
प्रायेण चूचुकयुगं परिगृह्य रागात् ॥
केशांस्तु दक्षिणकरेण विकृष्य मन्दं
कुर्यात्सुविह्वलतनुं किल पञ्चमीषु ॥ ७ ॥

अथ चित्रिण्याश्चन्द्रकला—

अधरं परिचुम्ब्य, कन्धरामथ संश्लिष्य, नखैर्नितम्बकम् ॥
त्रिलिखन्, द्रुतमेव चित्रिणीं ननु षष्ठ्यां द्रवतां नयेन्नरः ॥८॥
कण्ठे सम्परिरभ्य बाहुलतया नाभिं लिखन् पाणिजै-
र्दष्ट्वा चापि रदच्छदं सपुलकं गृह्णन्नुरोजद्वयम् ॥
कुर्वन्मन्मथमन्दिरे करिकरक्रीडायितं बुद्धिमा-
नष्टम्यां स्मरवारिनिर्झरवतीं कुर्वीत चित्रप्रियाम् ॥ ९ ॥

---

१ द्वितीयायाम् ।
२ नखक्षतविशेषम् । तल्लक्षणम्-'अव्यक्तरेखं कृतरोमहर्षं' इत्यग्रे वक्ष्यति । ३ वशे पद्मिनीमिति पुस्तकान्तरे पाठः ।
४ अङ्गुल्या घट्टनमित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कर्णोरुस्तनमध्यपृष्ठमदनागारेषु कट्यां तथा
कामिन्या निजवामपाणिकमलं कान्तः समालोडयन् ॥
ग्रीवा पाणिरुहैर्लिखंश्च शनकैश्चुम्बन् ललाटं भृशं
कुर्यादाशु विसृष्टमन्मथजलां रामां दशम्यां तिथौ ॥ १० ॥
गाढं सम्परिरभ्य गण्डफलके चुम्बन्दशंश्चाधरं,
कर्णश्रोणिनखप्रदानरसिकः कुर्वन्निमेषं दृशोः ॥
सङ्कर्षंश्चिकुरान्विलासकुशलः सीत्कारयुक्तां प्रिया
द्वादश्यां त्वरयातिविह्वलतनुं कुर्यात्पुमांश्चित्रिणीम् ॥ ११

अथ शङ्खिन्याश्चन्द्रकला—

बाहुभ्या परिरभ्य गाढमधरं दन्तैर्दशन्निर्दयं,
दोर्मूले खरपाणिजक्षतचयं यच्छन्यथेष्टं भृशम् ॥
सङ्कुर्वन् छुरितं कुचद्वयतटे नूनं तृतीयास्त्वलं
मुक्तानङ्गजलां स्वकीयवशगां कुर्यान्नरः शङ्खिनीम् ॥ १२
वक्षःकपोलगलकर्णपदेषु यच्छन्
प्रायो नखानि परिरभ्य कृतास्यपानः ॥
गाढं विमर्द्य मदनालयमाशु नारीं
सन्द्रावयेन्नरवरः किल सप्तमीषु ॥ १३ ॥
[1]परिरभ्य दशन् रदच्छदं प्रबलाघातरतो वराङ्गके ॥

१ परिरभ्य रदच्छदं पिबन् सुरतेशो रतिभावकोविदः । इति पुस्तकान्तरे पाठः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

(चित्र संख्या ७)

शङ्खिन्याश्चन्द्रकलाबोधककोष्ठकम् ।

स्थानानि	अङ्गे	अधरे	बाहुमूले	स्तनद्वय प्रान्तभागे	उरसि	कपोले	कण्ठे	कर्णे	पादे	आस्ये	योनौ	ग्रीवायाम्	कुचयोः
३ तृतीयायाम्	गाढालिङ्गनम्	दशनैः खण्डनम्	नखक्षतदानम	छुरिताख्यनखक्षतदानम्	०	०	०	०	०	०	०	०	०
७ सप्तम्याम्	आलिङ्गनम	०	०	०	नखैर्विलेखनम	नखक्षतदानम् ।	नखैर्लेखनम् ।	नखक्षतदानम्	नखैर्विलेखनम	पानं कुर्वन्	शिश्नं प्रवेश्य घट्टयेत् ।	०	०
११ एकादश्याम्	आलिङ्गनम	दन्तैः खण्डनम	०	०	०	०	०	०	०	०	आघातपूर्वकं प्रान्ते नखैर्विलेखनम्	०	०
१३ त्रयोदश्याम्	०	०	०	०	०	चुम्बनम्	०	०	०	०	०	नखक्षतदानम्	गाढविमर्दनम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हस्तिन्याश्चन्द्रकलाबोधककोष्ठकम् ।

स्थानानि	योनौ	नाभिमूले	अधरे	पार्श्वे	कुचयोः	नयनयोः	कक्षयोः	ऊर्वोः	स्तनमण्डले	चूचुके	अङ्गे
९नवम्याम्	शिश्नेन करेण मा दृढं विर्दनम्	चंचलकरेण स्पर्शनम्	दन्तैः खण्डनम् ।	मर्दनम्	मर्दनम्	०	०	०	०	०	०
१४ चतुर्दश्याम्	शिश्नं प्रवेश्य घट्टयेत्	०	०	०	०	चुम्बनम्	नखक्षतदानम्	०	०	०	०
१५ पूर्णिमायाम्	करेण संस्पर्शनम्	०	०	०	०	०	नखैर्विलेखनम्	नखक्षतदानम्	नखक्षतदानम्	करेण संस्पर्शनम्	नानाविधालिङ्गनम् ।
३० अमावास्याम्	करेण संस्पर्शनम्	०	०	०	०	०	नखैर्विलेखनम्	नखैर्विलेखनम्	नखक्षतदानम्	करेण संस्पर्शनम्	नानाविधालिङ्गनम् ।

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

नखरः परितो विदारयन्
स्त्रवशं कृष्णतिथौ नयेत्प्रियाम् ॥ १४ ॥
त्रिलिखन्नखरैः शिरोधरामथ गृह्णंश्च कुचौ ससीत्कृतम् ॥
परिचुम्ब्य कपोलमङ्गनां श्लथयेदाशु तिथौ मनोभुवः १५।

अथ हस्तिन्याश्चन्द्रकला—

मदनसदनमुच्चैर्मर्द्दयन्नाभिमूले
तरलितनिजपाणिर्दन्तवासो निपीय ॥
मृदुतरकरजाग्रैः सँल्लिखन् पार्श्वदेशं
कलितकुच इभीनां वल्लभः स्यान्नवम्याम् ॥ १६॥
नयने परिचुम्ब्य कक्षयो-
र्नखराघातरतः, स्मरालये ॥
रचयन् करिकेलिमानये-
त्स्वत्रशं शम्भुतिथौ द्विपाङ्गनाम् ॥ १७ ॥
नानाऽऽलिङ्गनचुम्बनानि रचयन् प्रायेण तीक्ष्णैर्नखैः
कक्षोरुस्तनमण्डलान्यकरुणं सन्दारयन् केलिषु ॥
कामागारचुचूलिकाञ्चितकरः सन्त्यक्तरत्यम्बुकां
दर्शे पूर्णतिथौ च निःसहतनुं कुर्यान्नरो हस्तिनीम् ॥ १८॥

इतिश्रीलाडखानविनोदाय महाकविकल्याणमल्लविरचिते अनङ्गरङ्गे चन्द्रकलानिरूपणं नाम द्वितीयं स्थलम् ॥

१ एकादश्याम्। २ त्रयोदश्याम्। ३ चतुर्दश्याम्। ४ चूचुकम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ शशमृगादिजातिभेदेन सुरतभेदो निरूप्यते ॥
आरोहैर्मदनाङ्कुशस्य पुरुषा ज्ञेयाः सदाथ स्त्रियो
योनीनां परिणाहकै रसनवादित्याङ्गुलीकैः क्रमात् ॥
जात्या ते तु नराः शशाश्च वृषभा अश्वास्तथैवाङ्गना
मृग्योऽश्वा द्विरदाङ्गनाश्च कथिताः प्राक्सूरिभिः सर्वतः १
हरिणीशशयोर्वृषाश्वयोः समयोगः करिणीतुरङ्गयोः ॥
भवतीह परस्परं द्वयोर्नितरां प्रीतिरनङ्गसङ्गरे ॥ २ ॥
हरिणीवृषभं तथाश्विकातुरगं चोच्चमिति द्वयं रतम् ॥
तुरगीशशकं द्विपीवृषं स्मृतमेतद्द्वितयं तु नीचकम् ॥३॥
कुरङ्गीहययोर्योगे रतमत्युच्चकं विदुः ॥
हस्तिनीशशयोश्चाथ रतं स्यादतिनीचकम् ॥ ४ ॥
तत्र प्रशस्तं सुरतं समं स्यादुच्चद्वयं मध्यममेव विद्यात् ॥
नीचाधमात्युच्चमथातिनीचमत्यन्तनिन्द्यं कवित्रिभिःप्रदिष्टम् ५
कृमयो रुधिरोद्भवास्त्रिधा लघुमध्योरुबलाः स्मरालये ॥
जनयन्ति बलानुसारतो बहुकण्डूं वनिताजनस्य ते ॥६॥
प्रमाणहीनलिङ्गेन सा कण्डूर्नोपशाम्यति ॥
अतो न नीचसम्भोगे तुष्टिं गच्छन्ति योषितः ॥ ७ ॥
वराङ्गमध्यं नारीणामत्यन्तं कोमलं स्मृतम् ॥
अतिप्रमाणलिङ्गेन नातस्तासां सुखं भवेत् ॥ ८ ॥
समप्रमाणलिङ्गेन स्थूलेन सुदृढेन च ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या ९)

शशहरिण्यादिसङ्गभेदादिप्रदर्शककोष्ठकानि ।

शशस्य ।

भेदाः	नामानि	गुह्यस्थानम्	अङ्गुलि-सङ्ख्या	प्रमाणम्	सुरतम्
१	शशपुरुषः हरिणी स्त्री	शिश्नः योनिः	६ ६	दीर्घः गम्भीरा	उत्तमम्
२	शशपुरुषः अश्वी स्त्री	,, ,,	६ ९	,, ,,	मध्यमम्
३	शशपु० करिणी स्त्री	,, ,,	६ १२	,, ,,	अधमम्

वृषस्य ।

भेदाः	नामानि	गुह्यस्थानम्	अङ्गुलि-सङ्ख्या	प्रमाणम्	सुरतम्
१	वृषपुरुषः हरिणी स्त्री	शिश्नः योनिः	९ ६	दीर्घः गम्भीरा	मध्यमम्
२	वृषपुरुषः अश्वी स्त्री	,, ,,	९ ९	,, ,,	उत्तमम्
३	वृषपु० करिणी स्त्री	,, ,,	९ १२	,, ,,	अधमम्

अश्वस्य ।

भेदाः	नामानि	गुह्यस्थानम्	अङ्गुलि-सङ्ख्या	प्रमाणम्	सुरतम्
१	अश्वपु० हरिणी स्त्री	शिश्नः योनिः	१२ ६	दीर्घः गम्भीरा	अधमम्
२	अश्वपुरु० अश्वी स्त्री	,, ,,	१२ ९	,, ,,	मध्यमम्
३	अश्वपु० करिणी स्त्री	,, ,,	१२ १२	,, ,,	उत्तमम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

शमयन्मूलकण्डूतिं स्यन्दयंश्च मुहुर्मुहुः ॥ ९ ॥
कामकेलिकलाभिज्ञः सुखयन्विविधैर्गुणैः ॥
विसृष्टकामसलिलां वशीकुर्यान्मृगीदृशम् ॥ १० ॥
नारी विसृष्टकुसुमेषुजला रतान्ते
नृत्यं करोति बहुबल्गनरोदने च ॥
वैकल्यमेति मुकुलीकृतचारुनेत्रा
शक्नोति नो कमपि सोढुमतिप्रयासम् ॥ ११ ॥
चिरमध्यमशीघ्रसम्भवा नरनार्योस्तु विसृष्टिरुच्यते ॥
समयप्रमितिप्रभेदतो नवधैवं सुरतं समीरितम् ॥ १२ ॥
चण्डमध्यममन्दाख्यांस्त्रीन् वेगांस्तु विदुस्तयोः ॥
क्रिया च त्रिविधा प्रोक्ता लघुमध्यचिरोदया ॥ १३ ॥
अत्रापि कालभेदेन नवधात्वं समूहयेत् ॥
सप्तविंशतिसङ्ख्या हि कीर्त्तितैवं रतिर्बुधैः ॥ १४ ॥
प्रचण्डवेगे बहुशो विसृष्टिः कामाकुलत्वं रतिलोलता च ॥
स्यान्मन्दवेगे विपरीतमेतत्तन्मध्यभावः खलु मध्यमेषु ॥ १५ ॥

अथ शशस्वरूपं निरूप्यते—

प्रायः कोमलकुन्तलाः पृथुदृशः शान्ताश्च तुच्छाशनाः
सूक्ष्माङ्गाः शुचयः सुवर्त्तुलमुखास्तुल्याल्पदन्तास्तथा ॥
बिभ्राणाः करजानुपादजघनग्रीवोरुषु श्यामतां
धन्याः स्वल्परताः सुगन्धिमदनस्यन्दा विनीताः शशाः १६

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ वृषभलक्षणानि—

क्रूराः प्रोन्नतमौलयो दृढभुजाः सुप्रौढवक्षःस्थला
रूक्षाः कूर्मनिभोदराश्च कठिनास्त्यागान्विताः पीवराः ॥
शोणान्तःस्थिरदीर्घलोचनभृतः स्वारक्तहस्तोदरा
व्यालोला वृषभा नवाङ्गुलमितं कामाङ्कुशं बिभ्रति १७

अथाश्वलक्षणानि—

दीर्घस्थूलशिरोरुहाश्चलदतिस्फारेक्षणाः क्रोधना
अत्यन्तं कृशदीर्घकन्धररदश्रोत्रानना लोभिनः ॥
पीनोरःस्थलदीर्घबाहुयुगला निद्रालवः सालसाः
प्रौढा वक्रनखाङ्घ्रिजानुयुगला गम्भीरसम्भाषिणः ॥१८॥
धृष्टाः खण्डरते रताश्च नितरां दीर्घाङ्गुलिश्रेणयः
स्थूलस्त्रीरतिलालसा बहुभुजो गत्या तु पृथ्व्यान्विताः ॥
भूरिक्षारविगन्धिमन्मथजलप्रायास्तथा व्याकुला
आदित्याङ्गुलिसम्मितं च तुरगा लिङ्गं सदा बिभ्रति १९

अथ मृगीलक्षणानि—

सान्द्राकुञ्चितकुन्तला समशिरास्तन्वी सुतुङ्गस्तनी
फुल्लेन्दीवरलोचनाल्पविवरघ्राणा च तुच्छोदरी ॥
आरक्ताधरपाणिपादयुगला पीनोरुकामालया
प्रायः कोमलपल्लवालघुभुजा विस्तीर्णगण्डश्रुतिः॥२०॥
ईर्ष्यालुः सुकुमारिका पिकरवाऽत्यन्तं रते लम्पटा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

बिभ्रत्यम्बुजमञ्जुगन्धिमदनस्यन्दं तथाल्पाशना
सुश्रोणी सरलाङ्गुलिर्गजगतिश्चञ्चन्मना रागिणी
ज्ञेया निम्नषडङ्गुलैः परिमितं गुह्यं वहन्ती मृगी॥ २१॥

अथ वडवालक्षणानि—

मौलिं निम्नसमुन्नतं विदधती स्थूलर्जुसान्द्रैः कचै-
र्नीलाम्भोजदलेक्षणायतगलश्रोत्रानना कोमला ॥
पीनश्रोणिपयोधरा शुभगातिर्गम्भीरनाभिह्रदा
किञ्चित्पृथ्वधरा च मांसलभुजा क्षामोदरी कोपिनी॥२२॥
शोणाम्भोरुहचारुपाणिचरणा निद्रासुभोज्यप्रिया
विस्तीर्णां दधती कटिं चलमनाः कान्तेऽनुरागान्विता ॥
कामाम्भः पललप्रगन्धि सुचिरात्सम्भोगकाले द्रवे-
द्विज्ञेया वडवा नवाङ्गुलमितं गुह्यं वहन्ती बुधैः ॥२३॥

अथ करिणीलक्षणानि—

पीनघ्राणकपोलकर्णगलकाप्रतिस्थूललम्बौष्ठिका
पिङ्गाक्षी दरवक्रपर्वनिवहा पृथ्वल्पनीलालका ॥
ह्रस्वस्थूलकराङ्घ्रिबाहुयुगला गम्भीररूक्षस्वरा
कामार्त्ता सततं सुतीक्ष्णदशना दुष्टा च वीतत्रपा ॥२४॥
दुःशीला शबलाङ्गिका पृथुकुचा कष्टैकसाध्या रता-
वत्यन्तं बहुभोजना च नितरां पापेषु बद्धस्पृहा ॥
बिभ्रत्यैभमदोग्रगन्धमपि सा कन्दर्पनीरं सदा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

ज्ञेया भानुमिताङ्गुलीकमदनाभासा बुधैर्हस्तिनी ॥२५॥
इति निर्दिष्टभेदानां व्यभिचारोऽपि लक्ष्यते ॥
श्रेष्ठमध्याधमत्वेन साङ्कर्याच्च विशेषतः ॥२६॥

इति श्रीलाडखानविनोदाय महाकविकल्याणमल्लविरचिते अनङ्गरङ्गे जातिविशेषपूर्वकं सुरतभेदनिरूपणं नाम तृतीयं स्थलम् ॥

अथाङ्गनानां सामान्यधर्मा निरूप्यन्ते ॥

यावत्षोडशसङ्ख्यमब्दमुदिता बाला ततस्त्रिंशतं यावत्स्यात्तरुणीति, बाणविशिखप्रख्यं तु यावद्भवत् ॥
सा प्रौढेत्यभिधीयते कवित्वरैर्वृद्धा तदूर्ध्वं स्मृता निन्द्या कामकलाकलापविधिषु त्याज्या सदा कामिभिः।१।

बाला नवीनसुरते मुदिता तमिस्रे
सञ्जायतेऽथ तरुणी महति प्रकाशे ॥
प्रौढा प्रकाशतमसोः समुपैति सौख्यं
वृद्धा तु न क्वचन जीवितहारिणी सा ॥ २ ॥
बाला ताम्बूलमालाद्यैस्तरुणी भूरिभूषणैः ॥
सुप्रेम्णा रज्यते प्रौढा वृद्धा त्वालापगौरवैः ॥३॥
यावद्दशाब्दमुदिता जन्मतो नाम कन्यका ॥
तत ऊर्ध्वं रुद्रसमास्तावद्गौरीतिविश्रुता ॥

१ पुस्तकान्तरेऽद्यः पद्यं नास्ति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage: Digitization: Sarayu Trust/eGangotri

(चित्रं सख्या १०)

स्त्रीणां बालादिभेदप्रदर्शकं कोष्ठकम् ।

स्त्रीणां वर्षसङ्ख्या	११ वर्षमारभ्य १६ वर्षपर्यन्तम्	१६ वर्षात् ३०वर्षपर्यन्तम्	३० वर्षात् ५५ वर्ष पर्यन्तम्	५५ वर्षादूर्ध्वम्
वयोभेदानामभेदः	बाला	तरुणी	प्रौढा	वृद्धा
कामविलासविषये	योग्या	योग्या	योग्या	अयोग्या
मैथुनेऽतिरुचिः	अन्धकारेऽर्धरात्रे	प्रकाशे	अन्धकार प्रकाशयोः	न क्वापि आयुष्यक्षतिकारिणी
वश्या	ताम्बूलस्रगादिभिः	अलङ्कारादिभिः	दृढप्रेम्णा	प्रशंसापूर्वक भाषणैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कृशतनुरतिदीर्घा निम्नकक्षा च कृष्णा
सुचिरपतिवियुक्ता भामिनी स्यात् श्लथाङ्गी ॥
पृथुलतरशरीरा गौरवर्णातिखर्वा
सततसुरतयोग्या व्यूढकक्षा दृढा स्यात् ॥ ४ ॥

अथ प्रकृतिलक्षणानि—

कफप्रकृतिका श्रेष्ठा पित्तला मध्यमा स्मृता ॥
अधमा वातला नारी तल्लक्ष्माण्यपि चक्ष्महे ॥५॥
सुस्निग्धदन्तनखलोचनपादयुग्मा
मानोन्नता प्रियतमे सुदृढानुरागा ॥
श्यामाथ शीतमृदुमांसलगुह्यरन्ध्रा
प्रोक्ता कफप्रकृतिरेव वरा पुरंध्री ॥ ६ ॥
स्यात्पित्तला तु गौराङ्गी शोणलोचनपाणिजा ॥
क्षणं रुष्टा प्रसन्ना च पीनश्रोणिपयोधरा ॥ ७ ॥
बिभर्ति घर्मसलिलं विश्रगन्धि सुबुद्धिका ॥
श्लथकोष्णवराङ्गी च कुशला सुरते मृदुः ॥ ८ ॥
वातला तु कठोराङ्गी रूक्षकेशी प्रलापिनी ॥
चञ्चला बहुभोज्या च कृष्णपाणिजलोचना ॥९॥
श्यामा धूसरवर्णा च सुरते कठिना भृशम् ॥
गोजिव्हाभखरस्पर्शं बिभर्त्ति मदनालयम् ॥१०॥

अथ देवसत्त्वादय उच्यन्ते—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रसन्नवक्त्राम्बुजसौरभाङ्गी
सन्तोषयुक्ता शुचिकर्मदक्षा ॥
प्रियम्वदा भूरिधना जनाढ्या
नारीयमुक्ता किल देवसत्त्वा ॥ १ ॥
सङ्गीतलीलारसिकातिशान्ता
सुगन्धिमाल्यादिरुचिः शुभाङ्गी ॥
विलासिनी निर्मलचारुवेषा
गन्धर्वसत्त्वा वनिता प्रदिष्टा ॥ २ ॥
अपेतलज्जा मधुमांससक्ता
पीनस्तनी चम्पकगौरदेहा ॥
रोषान्विता सन्ततभोगवाञ्छा
प्रोक्ता कवीन्द्रैः खलु यक्षसत्त्वा ॥ ३ ॥
आतिथ्यसख्यादिषु बद्धभावा-
नुरागिणी निर्मलचित्तवृत्तिः ॥
नानाव्रतैरेति न च प्रयासं
मनुष्यसत्त्वा परिकीर्त्तिता सा ॥ ४ ॥
दुश्चारिणी कुत्सितभूरिभोज्या
हृष्टातिदुष्टा परितप्तगात्री ॥
खर्वातिकृष्णा सविकारवक्त्रा
मालिन्ययुक्ता हि पिशाचसत्त्वा ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

व्याकुला भ्रान्तिशीला च सोच्छ्वासा बहुजृम्भिका ॥
निद्रासक्ता च सततं नागसत्त्वेति सा स्मृता ॥ १६ ॥
उद्वेगं निष्फलं कुर्यान्नेत्रे सम्भ्रामयेन्मुहुः ॥
अतिक्षुधार्त्ता सततं काकसत्त्वेति सोच्यते ॥ १७ ॥
अत्यन्तं चपला या तु सततं भ्रान्तलोचना ॥
दन्तसङ्गरसक्ता च कपिसत्त्वेति तां विदुः ॥ १८ ॥
स्वभावदुष्टा वाक्यानि विप्रियाण्येव भाषते ॥
अपेतरागा स्नानादौ खरसत्त्वेति सा स्मृता ॥ १९ ॥
जातिसत्त्वादयो ये तु नारीणामत्र भाषिताः ॥
प्रधाना प्रकृतिर्ज्ञेया तेषु सर्वेषु पण्डितैः ॥ २० ॥

अथ स्त्रीणां नाशहेतव उच्यन्ते—

पितृसदननिवासः सङ्गतिः पुंश्चलीभिः
प्रवसनमपि पत्युर्वार्धकं सेर्ष्यता च ॥
वसतिरपरपुम्भिर्दुष्टशीलैरवश्यं
क्षतिरपि निजवृत्तेर्योषितां नाशहेतुः ॥ २१ ॥

अथ वैराग्यहेतवः—

कार्पण्यादतिमानरोगविरहोद्योगादिपारुष्यतो
मालिन्यासमयज्ञतादिभयतः शोकाद्दरिद्रादपि ॥

१ अतिशयोद्योगादिति भावः।
२ असमयज्ञता सम्भोगकालानभिज्ञता।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भर्तॄणां तनुतादिभिश्च वपुषः काठिन्यतः, शङ्कना-
द्दोषाणां च वृथा, प्रयान्ति वनिता वैराग्यमुच्चैः सदा॥ २२॥

अथ विरक्तालक्षणानि—

नाभिपश्यति भर्त्तारं नोत्तरं सम्प्रयच्छति ॥
वियोगे सुखमाप्नोति संयोगे चातिसीदति ॥२३॥
शय्यामुपगता शेते वदनं मार्ष्टि चुम्बिता ॥
तन्मित्रैर्द्वेष्टि मानं च विरक्ता नाभिवाञ्छति ॥२४॥

अथ प्रीतिरुच्यते—

नैसर्गिकी विषयजा समा चाभ्यासिकी तथा ॥
चतुर्विधेति विद्वद्भिर्दम्पत्योः प्रीतिरुच्यते ॥ २५ ॥
अभ्यासविषयासाध्या दम्पत्योः सहजा तु सा ॥
सान्द्रा निगडभूता च प्रीतिर्नैसर्गिकी मता ॥ २६ ॥

---

१ वृथा दोषणामिति संबन्धः । मिथ्यादोषाणामारोपणादित्यर्थः।

२ अभ्यासेन विषयैश्च असाध्या । इयमेव प्रीतिः कामसूत्र-रतिरहस्यादौ आभिमानिकी इत्युच्यते । का० सू० अधि० २ अध्या० १ । प्रक० २ ।—

अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका ।
सङ्कल्पाज्जायते प्रीतिर्या सा स्यादाभिमानिकी ॥ इति ।

रति० परिच्छे० ५ श्लो ६—

नाभ्यासतो नो विषयाद्भवेद्या सङ्कल्पमात्रादभिमानजा सा ॥ इति।

लाहोरमुद्रितपुस्तकेऽस्य पद्यस्य स्थाने-

नैसर्गिकी स्वभावोत्था पूर्वजन्मसमुद्भवा ॥
दम्पत्योरुत्तमा प्रीतिर्वज्रलेखेव राजते ॥ इति पाठो वर्तते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मालाचन्दनभोज्याद्यैर्विषयैर्वर्द्धिता तु या ॥
प्रीतिर्विषयजा सोक्ता समयोगे समा स्मृता ॥ २७ ॥
आखेटदेवपूजादिकेलिसङ्गीतकर्मसु ॥
अभ्यासयोगात् या वृद्धिं याति साभ्यासिकी मता ॥ २८ ॥

अथ भोजनादिव्यवस्था—

भोजनं द्विगुणं स्त्रीणां बुद्धिः कृत्ये चतुर्गुणा ॥
निश्चयः षड्गुणः प्रोक्तः कामश्चाष्टगुणः स्मृतः ॥ २९ ॥

अथ योनिस्वरूपम्—

योनिरभ्यन्तरे कापि पद्मकिञ्जल्ककोमला ।
कापि स्यात् गुटिकाकीर्णा काचिद्वलिचयाकुला ॥३०॥
गोजिह्वाभा खरस्पर्शा काचिदभ्यन्तरे भवेत् ॥
पूर्वपूर्वतरा तासु श्रेष्ठा ज्ञेया विचक्षणैः ॥ ३१ ॥
योनिमध्येऽस्ति नाड्येका कामाङ्कुशसमा हि या ॥
लिङ्गेन क्षोभिता सैव मदवारि निरन्तरम् ॥ ३२ ॥
कामातपत्रात्सृजति स स्यन्द इति कीर्त्यते ॥
वराङ्गरन्ध्रादूर्ध्वं तु नासिकाभं यदस्ति तत् ॥३३॥
मन्मथच्छत्रमित्याहुराढ्यं मदशिराचयैः ॥

---

१ सादृश्यात् इत्यर्थः। इयमेव रतिरहस्यादौ सम्प्रत्ययात्मिका इत्युच्यते। रति० परि० ५ श्लो० ७.

सादृश्यतोऽन्यस्य भवेत्काचिद्या
तां प्रत्ययोत्थां कवयो वदन्ति। इति। प्रत्ययो विश्वासः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

योनिमध्ये नातिदूरात् पूर्णचन्द्रास्ति नाडिका ॥३४॥
मनोजवारिसम्पूर्णा स्त्रीणां तिष्ठति सर्वदा ।
तद्विसर्गे द्रुता नारी प्रोच्यते पूर्वसूरिभिः ॥३५॥

अथाल्पसाध्योच्यते—

मार्गादिश्रान्तदेहा चिरविरहवती मासमात्रप्रसूता
गर्भालस्या च नव्यज्वरयुततनुका त्यक्तमानप्रसन्ना ॥
स्नाता पुष्पावसाने[1] नवरतिसमये मेघकाले वसन्ते
प्रायःसम्पन्नरागा मृगशिशुनयना स्वल्पसाध्या रते स्यात् ३६

कन्दर्पयुद्धे प्रथमेऽल्पभावा[2]—
श्चिरेण तृप्तिं वनिता लभन्ते ॥
शीघ्रं द्वितीये धृतभूरिभावाः
पुंसः क्रमोऽयं विपरीत उक्तः ॥ ३७ ॥

अथ रताभिलाषचिन्हानि—

सङ्गृह्णात्यलकान्मुहुः स्तनयुगं वस्त्रेण नाच्छादये-
द्दन्तेनाप्यधरं दशेच्च विरमेत्सञ्जातलज्जा क्षणम् ॥
प्रायश्चुम्बति बालकं, निजवपुः सम्भञ्जते, जृम्भते,
रथ्यां चापि रुणद्धि, पश्यति च दोर्मूलं, हसत्यादरात् ॥३८॥
आलिङ्गेत्स्वसखीं प्रियं प्रलपति प्रत्युत्तरं याचते

---

१ पुष्पावसाने स्नाता ऋतुस्नातेत्यर्थः ।

२ भावः ऋथावयत्वम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सुव्यक्तं न च भाषते स्मितमुखी व्रीडां वृथा धारयेत् ॥
व्याजेनैव विलम्बते प्रकुरुते मौलौ च कण्डूयनं
नारीणां सुरतस्पृहा बुधजनैर्ज्ञेयेतिभावैः सदा ॥ ३९ ॥

इति श्रीलाडखानविनोदाय महाकविकल्याणमल्लवि-
रचिते अनङ्गरङ्गे चतुर्थं स्थलम् ॥

अथ वनितानां देशधर्मा उच्यन्ते—

विचित्रवेषा शुचिकर्मदक्षा
सुशिल्पिनी दन्तनखाद्विरक्ता ॥
मनोजसङ्ग्रामविनोदरम्या
स्यान्मध्यदेशप्रभवा[1] पुरन्ध्री ॥ १ ॥
उपभोगकलानुरागिणी
चिरसम्भोगरतप्रतोषिणी ।
करघातनतुष्टमानसा
वनिता मालवदेशसम्भवा[2] ॥ २ ॥
अभिघातरुचिर्विरज्यते
नखदन्तैः[3], परिरम्भलालसा ॥

१ हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ इति । केचित्तु गङ्गाय-मुनयोर्मध्यभागो मध्य देश इति वदन्ति ।

२ पूर्वमालवदेशजाता । अपरमालवदेशस्य अवन्तिपदेन 'प्रच-ण्डवेगा' इत्यत्र पृथगुपादानात् ।

३ नखदन्तकृत्यैरित्यर्थः । नखक्षतदन्तक्षतैरितियावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

बहुचुम्बनहार्यमानसा
वनिताऽऽभीरसमुद्भवा स्मृता ॥ ३ ॥
परिरम्भणलोलुपा रदच्छदघातैर्द्रवमेति सत्वरम् ॥
सुकुमारतनुर्मनोरमा सुरते नृत्यति लाटकामिनी ॥ ४ ॥
मृद्वी दुराचाररता वहन्ती
रतार्तिमुच्चैरपि नर्मदक्षा ॥
त्रपाविहीनातिमनोरमाङ्गी
स्यादान्ध्रकर्णाटभवा पुरन्ध्री ॥ ५ ॥
नितान्तकण्डूतियुतस्मरालया
द्रवन्ति चण्डध्वजघातनाच्चिरम् ॥
रतिप्रयोगे चतुराश्च योषितः
प्रकीर्तिताः कोशलदेशसम्भवाः ॥ ६ ॥
ईषद्धासमनोरमाश्च नितरां साक्षेपवाग्विभ्रमा
निर्लज्जाश्चपलाः कलासु कुशला गाढानुरागान्विताः।
नार्यः पाटलिपुत्रजा अपि महाराष्ट्रोद्भवाः सन्ततं
नानावेषविनोदभावरसिकाः सङ्कीर्तिताः पण्डितैः॥७॥

---

१ श्रीकण्ठ–कुरुक्षेत्रादिः। २ अपरमालवेन पश्चाल्लाटदेशः।
३ कर्णाटदेशात्पूर्वेण आन्ध्रदेशः।
४ अयोध्याप्रान्तः। ५ पटना।
६ नर्मदायाः कर्णाटस्य च मध्यभागः पूना, सोलापूर, कोल्हापूरप्रभृतिको देशो महाराष्ट्रः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कुसुममृदुशरीरा चुम्बनालिङ्गनादौ
बहुतरधृतभावा क्रूरचेष्टा विरक्ता ॥
विषमविशिखयुद्धे, स्तोकवेगा पुरन्ध्री
भवति तरलनेत्रा वङ्गजा[1] गौडजा[2] च ॥ ८ ॥

विपरीतरताभिलाषिणी गतलज्जा नखदानतोषिणी ।
नितसामनुरागशालिनी मदनार्ता कथितैवमुत्कली[3] ।९॥

प्रियम्वदा कोमलदेहवल्ली भृशं द्रवन्ती स्मरकेलिरङ्गे ॥
विलासदक्षा प्रचुरानुरागा स्यात्कामरूपप्रभवा[4] पुरन्ध्री ।१०।

निजदोषनिगूहने रताः
परदोषग्रहणेषु तत्पराः ॥
वनिता वनवाससम्भवा[5]
दृढदेहाः परिकीर्त्तिता बुधैः ॥ ११ ॥

प्रचण्डवेगा अतिकष्टसाध्याः
सुकोपवत्यश्चलनेत्रपाताः ॥
भवन्ति दुष्टाः किल सिन्धुजाता

---

१ मालदह, मुर्शिदाबाद, नदिया, कलकत्ता इति नाम्ना प्रसिद्धो देशो वङ्गः ।

२ ढाका, पावना, बगुडा, राजसाही फरीदपूर इति प्रसिद्धो देशो गौडः । आदि गौडदेशस्तु मथुराप्रान्तः ।

३ उडीसेति प्रसिद्धो देश उत्कलः, यत्र पुरी ।

४ आसाम इति प्रसिद्धो देशः । ५ कोङ्कणदेशात्पूर्वेण वनवासः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अवन्तिवाह्लीकभवाश्च[1][2] नार्यः ॥ १२ ॥
उपभोगरता सुलोचना
लघुसम्भोगविधिप्रतोषिणी ॥
शुभवेषधरा विचक्षणा
कथिता सा खलु गुर्जरी[3] बुधैः ॥ १३ ॥
नानोपभोगरसिका रतिरङ्गदक्षा
प्रोत्फुल्लपद्मनयना प्रियबद्धरागा ॥
कन्दर्पदर्पपरिदीपनभावशीला
ज्ञेया बुधैर्मृदुगतिः खलु तीरभुक्ता[4] ॥ १४ ॥
सम्भोगशिक्षाकुशलाः सलज्जाः
प्रियोपभोगा अतिचण्डवेगाः ॥
मनोरमाः पुष्पपुरप्रसूताः
स्युरङ्गजा[5] मद्रातिलङ्गजाश्च[6][7] ॥ १५ ॥
मृद्वयः सुवाचो लघुभोगसाध्याः
ससाहसा वीतभयत्रपाश्च ॥
समानरूपा द्रविडे[8] प्रजाताः

१ उज्जयिनी-(अपरमालवः) २ उत्तरापथः । ३ काठियावाद, अमदावाद इत्यादिको गुर्जरदेशः गुजरात इति प्रसिद्धः ।
४ तीरभुक्तम् तिरहुतदेशः । ५ राजमहल इति ख्यातः ।
६ मद्रास । ७ गोदावरीप्रान्तः ।
८ कर्णाटादक्षिणेन द्रविडदेशः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सौवीरदेशे मलये[1] च नार्यः ॥ १६ ॥
नखादिविन्यासकलाविहीनाः
सम्भोगसम्मर्दनजाततोषाः ॥
स्वभावतो दुष्टतमाः प्रचण्डाः
काम्बोजपौण्ड्रप्रभवाः[2] पुरन्ध्र्यः ॥ १७ ॥
दुर्गन्धिगात्रा लघुभोगतुष्टाः
सञ्चुम्बनाश्लेषणभावहीनाः ॥
म्लेच्छाङ्गनाः पर्वतजाश्च नार्यो
गाध्न्याश्च[3] काश्मीरभवास्तथैव ॥ १८ ॥
जात्यादिसाम्यमिति[4] तत्त्वत एव यस्तु
ज्ञात्वा नरः सकलकामकलाप्रवीणः ॥
सन्तोषयेच्च सततं सुरतप्रयोगे
प्राणैः समत्वमुपयाति स कामिनीनाम् ॥ १९ ॥

इति श्रीमल्लाडखानविनोदाय महाकविकल्याणमल्लकृते
अनङ्गरङ्गे जात्यादिधर्मनिरूपणं नाम
पञ्चमं स्थलम् ॥

---

१ मलयालम । २ काबुल
३ गाध्याश्च इति द्वि० पु० पाठः ।
४ जात्यादिसात्म्यमवबुध्य सदैव यस्तु इति पुस्तकान्तरे पाठः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ द्रावणादियोगा उच्यन्ते—

प्रागेव पुंसः सुरते न यावत्-
नारी द्रवेद्भोगफलं न तावत् ॥
अतो बुधैः कामकलाप्रवीणैः
कार्यः प्रयत्नो वनिताद्रवत्वे ॥ १ ॥
जात्यादिसाम्यं दुर्ज्ञेयं साङ्कर्यादिविशेषतः ॥
अत एवातिसौक्ष्म्याच्च कलाऽपीन्दोरगोचरा ॥ २ ॥
तस्माल्लोकहितार्थाय दम्पत्योः सुखसिद्धये ॥
नानौषधिविधानेन द्रवयुक्तिरुदीर्यते ॥ ३ ॥
मधुना सहितं व्योषचूर्णं यस्या वराङ्गके ॥
निक्षिप्यते वराङ्गी सा पुंसः प्राक् द्रवतां व्रजेत् ॥४॥
शुद्धं शङ्करबीजं च जातीरसविमर्दितम् ॥
वराङ्गमध्ये निक्षिप्तं नारीं सन्द्रावयेद्रते ॥ ५ ॥
चिञ्चाफलं ससिन्दूरं माक्षिकेण समन्वितम् ॥
क्षिप्तं गुह्यान्तरे योषां प्रागेव द्रवतां नयेत् ॥ ६ ॥
कर्पूरं टङ्कणं शम्भुबीजं चतितिभिः समैः ॥
सक्षौद्रलिप्तलिङ्गस्तु नरः सन्द्रावयेत्प्रियाम् ॥ ७ ॥

---

१ त्रिकटु । शुण्ठी–पिप्पली–मरिचानि । त्रिकटु त्र्यूषणं व्योषा इत्यमरः । अत्र कचित् घोषा इति पाठः । तत्र घोषेति नेनुवा घीया-तरोई इति प्रसिद्धः शाक विशेषः ।

२ पारा । ३ चमेली । ४ इमली । ५ सोहागा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मध्वाज्यागस्त्यपत्रोत्थरससम्मर्दितेन च ॥
टङ्कणेन ध्वजं लिप्त्वा द्रावयेदबलां नरः ॥ ८ ॥
जीर्णो गुडश्चिञ्चिणिकाफलं च
व्योषारजःक्षौद्रयुतं समांशम् ॥
एभिर्ध्वजं यः परिलिप्य शेते
कुर्यात्स रेतश्च्युतिमङ्गनानाम् ॥ ९ ॥
मरिचकनकबीजैः पिप्पलीलोध्रयुक्तै-
र्विमलमधुविमिश्रैर्मानवो लिप्तलिङ्गः ।
स्मरसमरविलासे कष्टसाध्यां च नारी-
मपगतरतिरागा संविदध्यादवश्यम् ॥ १० ॥

अथ स्तम्भनाधिकारः—

पतनान्मदनाम्भसो द्रुतं परितोषो न भवेद्विलासिनाम् ।
सुरतोत्सवसिद्धिहेतवे तदयं स्तम्भविधिर्निरूप्यते ॥ ११ ॥
लज्जालुमूलं गोक्षीरैर्वज्रीक्षीरेण वा पुनः ।
पिष्ट्वा स्वपादौ संलिप्य चिराद्वीर्यं न मुञ्चति ॥ १२ ॥
अथ कौसुम्भतैलेन वर्षाभूरजसापि वा ॥
लिप्तपादः पुमान् रेतो न जहाति रते द्रुतम् ॥ १३ ॥
सितायाः काकजङ्घाया मूलं श्वेताब्जकेसरम् ।

१ धत्तूरम् ।
२ लज्जावन्ती । ३ स्नुही, सेहुंड इति लोके । ४ पुनर्नवा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

क्षौद्रेण नाभिसंलेपात् वीर्यं स्तम्भ्नाति कामिनः ॥१४॥
शम्याकं[1] शम्भुबीजं च कर्पूरं तु समांशकम् ।
मधुना लेपयेन्नाभौ यः स वीर्यं न मुञ्चति ॥ १५ ॥
सितकोकिलमूलं[2] च बीजं पुष्योद्धृतं कटौ ।
बद्धं लोहितसूत्रेण बीजस्तम्भं करोत्यलम् ॥ १६ ॥
सप्तपर्णस्य[3] बीजं वा रविवारे समुद्धृतम् ।
वक्रे धृतं नृणां बीजं स्तम्भ्नाति सुरते चिरम् ॥ १७ ॥
श्वेतेषु[4]पुङ्खामूलं वा पुष्यार्के प्राप्य यः कटौ ।
कन्याकर्तितसूत्रेण बध्नाति स भजेच्चिरम् ॥ १८ ॥
बीजं सितपिकाक्षस्य[5] वटक्षीरेण पेषितम् ॥
करञ्ज[6]बीजमध्यस्थं स्तम्भयेद्वदने धृतम् ॥ १९ ॥

अथ वाजीकरणम्—

शक्तेरभावात्स्तम्भादि सर्वमेवाप्रयोजकम् ।
अतः शरीरपुष्ट्यर्थं वाजीकरणमुच्यते ॥ २० ॥
चूर्णं विदार्याः स्वरसैर्भावितं भानुशोषितम् ।
मध्वाज्यमिश्रितं लीढ्वा भजते वनिता दश ॥२१॥
स्वरसैर्भावितं धात्रीचूर्णमाज्यसितान्वितम् ।

१ आरग्वधः, अमलतास इति भाषायाम् ।
२ तालमखाना इति भाषायाम् ।
३ छतिवन्, छतौना इति भाषायाम् । ४ सपेत सरफोंका ।
५ तालमखाना । ६ करौंजा करौना इति इति लोके ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

क्षौद्रेण विलिहन् रात्रौ वृद्धोऽपि तरुणायते ॥ २२ ॥
कपिगोक्षुरगोरक्षबलानागबलाभवम् ॥
चूर्णं च शतपत्रायाः पीतं क्षीरेण पौष्टिकम् ॥ २३ ॥
सितासाधितगोक्षीरे माषान् सम्भाव्य शोषयेत् ॥
भानुपादैः पुनस्तेषां चूर्णस्य वटिका शुभाम् ॥ २४ ॥
कृत्वा घृतेन संसाध्य प्रदोषे भक्षयेत्सदा ॥
वृद्धोऽपि प्रबलो भूत्वा वनितानां शतं व्रजेत् ॥ २५ ॥
मध्वाह्वचूर्णकर्षं वा लीढ्वा मध्वाज्यमिश्रितम् ॥
पिबेत्तदनु गोक्षीरं यः स नारीशतं भजेत् ॥ २६ ॥
बीजं सितपिकाक्षस्य तण्डुलाः षष्टिकोद्भवाः ॥
द्वयोः कर्षं लिहन् रात्रौ मधुना दृढतां व्रजेत् ॥ २७ ॥
शतपत्रारसं सर्पिः तुल्यं तद्दशधा पयः ॥

---

१ अत्र कपिपदेन कपिकच्छूर्ग्राह्या 'नामैकदेशे नामग्रहणम्' इति न्यायात् । किवाँच, कौंछ इति भाषायां प्रसिद्धिः । २ गोखुर ।

३ अत्र गोक्षुरकाकेक्षु इति पाठोऽपेक्षितः ।
तथा च रतिरहस्ये सकलयोगाधिकरणे—
नागबलां सबलामथ शतावरीं वानरीं समं पयसा ।
गोक्षुरकेक्षुरकैः निशि निपीय रतिमल्लतामेति ॥
इत्यत्र काकेक्षुपर्यायभूतमेव इक्षुरकपदं प्रयुक्तम् ।
काकेक्षुः तालमखाना इति लोके प्रसिद्धः ।

४ खिरैंटी, वरियारी इति भाषायाम् ।

५ गंगेरन, गुलसकरी इति लोके ।

६ शतावर्याः ।

७ इदं पुस्तकान्तरे नास्ति । मध्वाह्वं जेठीमध इति लोके ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

दत्त्वा संसाधितं क्षौद्रसिताभ्यां पौष्टिकं परम् ॥ २८ ॥
मृतायस्त्रिफलायष्टीचूर्णं मधुघृतान्वितम् ॥
दिनान्ते लढि यो नित्यं स नारीं सुरते जयेत् ॥२९॥

अथ लिङ्गस्थूलीकरणम्—

लघुसूक्ष्मेण लिङ्गेन नैव तुष्यन्ति योषितः ॥
अतस्तत्प्रीतये वक्ष्ये स्थूलीकरणमुत्तमम् ॥ ३० ॥
बला नागबला कुष्ठं[1] वचा द्विरदपिप्पली ॥
बाजिगन्धा[2] हयरिपुरिति[3] सर्वं समांशकम् ॥ ३१ ॥
सञ्चूर्ण्य नवनीतेन लिङ्गलेपो विधीयते ॥
मुहूर्त्तादतिसूक्ष्मं च वाजिलिङ्गसमं भवेत् ॥ ३२ ॥
जातीरस[4]शिला[6]कुष्ठव्योषटङ्कणचूर्णकैः ॥
तिलतैलयुतैर्लेपात् लिङ्गवृद्धिः प्रजायते ॥ ३३ ॥
सैन्धवं मरिचं कुष्ठं बृहती[8] खरमञ्जरी ॥
हयगन्धा यवा माषाः पिप्पली गौरसर्षपाः ॥ ३४ ॥
तिलतैलेन संपिष्ट्वा मधुनोद्वर्त्तनं बुधः ॥
प्रयोजयेत्कर्णयोनिस्तनलिङ्गविवर्द्धनम् ॥ ३५ ॥

---

१ कुठ इति लोके २ अश्वगन्धा ।
३ करवीरम् कनैल इति भाषायाम् । ४ मालती ।
५ पारदम् । ६ मनः शिला ।
७ कण्टकारिका भटकटैया इति भाषायाम् ।
८ अपामार्गः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

C-0. Bhagavad Ramanuja National Research Institute, Melukote Collectio

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भल्लातं[1] कृष्णलवणं नलिनीदलमेव च ॥
दग्ध्वा तद्भस्म बृहतीफलजेनाम्भसा सह ॥ ३६ ॥
महिषीगोमयैः पूर्वं घृष्टे लिङ्गे विलेपयेत् ॥
तत्क्षणान्मुशलाकारं दृढं चैव भवेदलम् ॥ ३७ ॥
लोध्रकौसीसमातङ्गबलाकल्कैस्तिलोद्भवम् ॥
तैलं संसाधितं लिङ्गयोनिकर्णविवर्द्धनम् ॥ ३८ ॥

अथ भगसङ्कोचनविधिः—

प्रौढानवप्रसूतानां श्लथं गुह्यं न रोचते ॥
यूनामतस्तत्सङ्कोचविधिं सङ्क्षेपतो ब्रुवे ॥ ३९ ॥
सनालं कमलं पिष्ट्वा पयसा कारयेद्वटीम् ॥
तां निधाय क्षणं योनौ वृद्धापि स्यात्कुमारिका ॥ ४० ॥
देवदारुनिशायुग्मं सरसीरुहकेसरैः ॥
संलिप्तं मदनच्छत्रं सङ्कोचं परमं व्रजेत् ॥ ४१ ॥
लिप्त्वा पिकाक्षबीजैश्च वारिपिष्टैः स्मरालयम् ॥
नियमेन परं गाढं वराङ्गं लभतेऽङ्गना ॥ ४२ ॥
त्रिफलाधातकीपुष्पजम्बूत्वक्शावरैः[6] समैः ॥

१ भिलावा इति ख्यातम् । अतः परम्—
बृहतीफलभल्लातवाडिमीफलवल्कलैः ॥
साधितं कटुतैलं च मर्दनाल्लिङ्गवर्धनम् ॥
इति पद्यं काचिदधिकं दृश्यते ।
२ कसीस । ३ नागबला ।
४ हरिद्राद्वयम् । ५ धाय, धवई इति लोके । ६ शावरो लोध्रः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सक्षौद्रैर्लिप्तगुह्या च कन्येव जरती भवेत् ॥ ४३ ॥
कटुतुम्बीभवैर्बीजैः सलोध्रैः स्मरमन्दिरम् ॥
लिप्त्वा नवप्रसूतापि ध्रुवं कन्येव जायते ॥ ४४ ॥
वाजिगन्धावचाव्योषनिशेन्दीवरकुष्ठकैः ॥
तोयपिष्टैः स्मरागारं लिप्तं गाढतरं भवेत् ॥ ४५ ॥
मधूककाष्ठसारेण श्लक्ष्णेन मधुना सह ॥
वराङ्गं पूरितं यत्नादत्यन्तं दृढता व्रजेत् ॥ ४६ ॥

अथ योनिसंस्कारः—

लघ्वग्नौ सार्षपं तैलं जातीपुष्पैः प्रसाधयेत् ॥
नारीगुह्यं तदभ्यङ्गात्सुगन्धि सुरते भवेत् ॥ ४७ ॥
सुरदारुतिलारिष्टदाडिमाञ्जनकाञ्चनैः ॥
तैलं सुसिद्धमभ्यङ्गाद्योनिं सुरभितां नयेत् ॥ ४८ ॥

अथ लोमशातनम्—

कटुतैले नागचूर्णं क्षिप्त्वा सप्ताहमातपे ॥
निधेयं मर्दनात्तत्तु योनिलोमापहारकम् ॥ ४९ ॥
सप्ताहं भावितं शङ्खभस्म रम्भाम्भसा ततः ॥
तालेन युक्तं हरति योनिलोमानि योषिताम् ॥ ५० ॥
हरितालं पलाशस्य भस्म रम्भाजलान्वितम् ॥

१ देवदार इति भाषायाम् । २ अरिष्टम् रीठा इति लोके ।
३ अञ्जनकाञ्चनः कृष्णधत्तूरम् । ४ नागः शीसा इति ख्यातो धातुः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

एतस्य लेपाद्रोमाणि न रोहन्ति कदाचन ॥ ५१ ॥

अथ नष्टपुष्पसमुद्भवविधिः—

भृष्टं ज्योतिष्मतीपत्रं जपापुष्पं च वारिणा ॥
पिष्ट्वा पिबति सा भूयो नष्टं पुष्पं प्रविन्दति ॥ ५२ ॥
तण्डुला देवकाष्ठं च दूर्वापत्रं समं त्रयम् ॥
वारिपिष्टं पिबेद्या च नष्टं पुष्पं लभेत सा ॥ ५३ ॥

अथ पुष्पाधिक्यनिवारणम्—

पथ्या[1] रसाञ्जनं[2] धात्री त्रयं पिष्ट्वाम्भसा समम् ॥
पिबेद्यात्यन्तिकं पुष्पं सप्ताहात्परिनाशयेत् ॥ ५४ ॥
कपित्थं वेणुपत्रं च समांशं मधुना सह ॥
लीढं सप्ताहमाधिक्यं पुष्पस्योपशमं नयेत् ॥ ५५ ॥

अथ गर्भाधानविधिः—

रुक्मकाञ्चनताम्राणां भस्म क्षौद्रान्वितं त्र्यहात् ।
लीढं पुष्पान्तके स्त्रीभिः क्षेत्रशुद्धिं परां दिशेत् ॥ ५६ ॥
नागकेसरचूर्णं वा स्नाताज्येन त्र्यहं पिबेत् ।
क्षीरभुग्भर्तृसंसर्गाद्गर्भं धत्तेऽङ्गना ध्रुवम् ॥ ५७ ॥
वाजिगन्धामृतासर्जिक्वाथं स्नानदिने पिबेत् ।
सापि पुंयोगतो नारी गर्भं धत्ते न संशयः ॥ ५८ ॥

---

१ हरीतकी । २ रसोत । ३ वाजिगन्धामृतार्द्राणाम् इति लाहोरमुद्रितपुस्तके पाठः । तत्र अमृता हरीतकी, आर्द्रम् आर्द्रकमित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

शृङ्गबेरोषणक्षुद्राकणाकेसरजं रजः ।
गोघृतेन पिबेदद्या तु बन्ध्यापि लभते सुतम् ॥५९॥
पुष्योद्धृतं लक्ष्मणाजं मूलं भर्त्राभिषेषितम् ॥
पिबेत् घृतेन सा गर्भं धत्ते क्षीराशना ध्रुवम् ॥६०॥
बीजपूरस्य बीजं वा क्षीरसिद्धं घृतान्वितम् ।
ऋतौ त्र्यहं पिबेद्या सा गर्भं धत्ते न संशयः ॥६१॥
पुष्योद्धृतं श्वेतबलामूलं कर्षं च तत्समम् ।
यष्टीचूर्णं सितायास्तु पलमेकं विमिश्रयेत् ॥६२॥
पिष्ट्वा गोरेकवर्णायाः सवत्सायास्तथा पयः ।
आदाय क्षिप्त्वा तन्मध्ये पिबेत्स्नाता वराङ्गना ॥६३॥
न खादेत्तद्दिने किञ्चिदथ रात्रौ पतिं व्रजेत् ।
प्रातः क्षीरौदनं भक्षेद्गर्भिणी स्यादसंशयम् ॥६४॥

अथ गर्भस्तम्भनम्—

कुलालपाणिसंलग्नः पङ्कः क्षौद्रसमन्वितः ॥
अजाक्षीरेण सम्पीतो गर्भस्तम्भं करोत्यलम् ॥६५॥
यष्टीशावरधात्रीणां चूर्णं पीतं पयोऽन्वितम् ।
सप्ताहाच्चलितं गर्भं स्त्रीणां संस्तम्भयेद्ध्रुवम् ॥६६॥
कन्दं लोहितपद्मस्य क्षीराज्यमधुसंयुतम् ॥

१ शृङ्गवेरम् आर्द्रकम् आदी इति भाषायाम् । ऊषणं मरीचम् । क्षुद्रा कण्टकारिका । कणा पिप्पली । २ बिजपूरः बिजौरा निबु । ३ सावरो लोध्रम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सुपक्वं शीतलं कृत्वा सप्ताहं याङ्गना पिबेत् ॥६७॥
गर्भश्रावं तथा वान्तिं शूलं शोथं त्रिदोषजम् ॥
अन्यांश्च बहुशो रोगान्नाशयेन्नात्र संशयः ॥६८॥

अथ सुखप्रसवविधिः—

मातुलुङ्गमधूकोत्थं चूर्णं मधुघृतान्वितम्।
पीत्वा सूते सुखं नारी शीघ्रमेव न संशयः ॥६९॥
गृहधूमं समादाय पिबेत्पर्युषिताम्भसा ॥
या सा सूते सुखेनैव शीघ्रमेव वराङ्गना ॥७०॥
रविवारे गृहीतस्य गुञ्जामूलस्य बन्धनात्।
नीलसूत्रैः कटौ मूर्ध्नि जायते प्रसवो द्रुतम् ॥७१॥
ॐमन्मथ सथमथ वाहिलि बालस्योदरं मुञ्च मुञ्च लघु स्वाहा ॥
इतिमंत्रेण सञ्जप्तं पातुं देयं जलं बुधैः।
सूतेऽङ्गना सुखं शीघ्रं मंत्रराजप्रसादतः ॥७२॥

अथ बन्ध्यात्वापादनम्—

गुडं त्रैहायनं खादेत् पलमात्रं तु नित्यशः ॥
मासार्द्धं सा भवेद्बन्ध्या यावदायुर्न संशयः ॥७३॥
तुषतोयेन सङ्क्वाथ्य मूलमग्नितरूद्भवम् ॥

१ मातुलुङ्गो बीजपूरम्।
२ क्वचित् जयमन्मथमन्मथमथ० इति पाठः।
३ अग्नितरुः चित्रकः चिरायता इति भाषायाम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पुष्पावसाने त्रिदिनं पीत्वा बन्ध्याभिजायते ॥७४॥
कदम्बस्य[1] फलं, पादं मक्षिकाया, दिनत्रयम् ।
पीतमुष्णोदकेनैतद्बन्ध्यात्वं प्रतिपादयेत् ॥ ७५ ॥
रक्षोभूरुहबीजानां[2] पलार्द्धं तण्डुलाम्भसा ॥
ऋतौ पीतं तु सप्ताहं बन्ध्यां कुर्यान्मृगीदृशम् ॥७६॥

अथ केशोद्भवरञ्जनविधिः[3]—

गव्येन पयसा पिष्टं तिलपुष्पं सगोक्षुरम् ।
सप्ताहलेपनात्कुर्यात्केशान्दीर्घान्बहूनपि ॥ ७७ ॥
दन्तीशावरकल्केन[4] सिद्धं तैलं तिलोद्भवम् ।
पातं कार्श्यं च खर्वत्वं केशानां हन्ति लेपनात् ॥७८॥
गुञ्जाफलरजः क्षौद्रयुक्तं लेपान्निहन्त्यलम् ।
इन्द्रलुप्तं तथा केशबाह्यारोहणकारणम् ॥ ७९ ॥
दग्धेभदन्तं सुश्लक्ष्णं पिष्ट्वा तैलेन लेपयेत् ।
इन्द्रलुप्तं क्षयं याति केशा रोहन्ति भूरिशः ॥८०॥
आम्रप्रसूनं त्रिफला त्वक् पाण्डवतरोरपि[5] ॥

---

१ लाहोरमुद्रितपुस्तके इदं पद्यं नास्ति । अस्य स्थाने-
चन्दनं सर्षपाश्चैव शर्करा समभागतः ॥
पीत्वा तण्डुलतोयेन रामारक्तं विनश्यति ॥ इति पद्यं दृश्यते ।
२ रक्षोभूरुहबीजम् बहेडा इतिलोके प्रसिद्धम् ।
३ केशानाम् उद्भवरञ्जनयोः विधिः । ४ यस्या बीजं जैपाल, जमालगोटा इति प्रसिद्धं सा दन्ती । कस्मिंश्चित्पुस्तके 'दन्तिनां रदकल्केन' इति पाठः । ५ पाण्डवतरुः अर्जुनवृक्षः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पिण्डारकं चेतिकल्कैस्तिलतैलं प्रसाधयेत् ॥८१॥
नीलतैलमिति ख्यातं केशसंरञ्जनं परम् ।
क्षिप्तोऽत्र हंसपक्षोऽपि ध्रुवं मेचकतां व्रजेत् ॥८२॥
माजूफलकणानीलीसैन्धवैः सारनालकैः[1] ।
पिष्टैः शिरोरुहा लिप्ताः श्यामवर्णा भवन्त्यलम् ॥८३॥
निम्बतैलं पलं नित्यं मासैकं यः पिबेन्नरः ॥
शुक्लाः केशाः क्रमेणैव तस्य यान्त्यलितुल्यताम् ॥८४॥
गोरोचनाः कृष्णतिलाः काकमाची[2] शतावरी ॥
अमीभिश्चिकुरा लिप्ताः श्यामतां यान्ति सत्वरम् ॥८५॥

अथ केशश्वेतीकरणम्—

तिलानां स्नुहिदुग्धेन भावितानां च यद्भवेत् ।
तैलं तल्लेपनात्केशाः स्फटिकाभा भवन्ति हि ॥८६॥
वज्रीक्षीरेण या धात्री भाविता मज्जनात्तया ।
तत्क्षणादेव मर्त्यानां निपतन्ति स्वयंकचाः ॥८७॥

अथ मुखकण्टकहरणम्—

वचाशावरधान्यानां लेपनाद्यौवनोद्भवाः ।
मुखस्य पिटका यान्ति नरनार्योः क्षयं त्र्यहात् ॥८८॥
कण्टकैः शाल्मलीयैश्च क्षीरपिष्टैर्विलेपयेत् ।
मुखं तस्यापि पिटका नाशं गच्छन्त्यसंशयम् ॥८९॥

१ आरनालकं कांजी इति प्रसिद्धम् । २ काकमाची काकजङ्घा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

लोध्रसैन्धवसिद्धार्थवचानां परिलेपनात् ।
गण्डस्थाः पिटका यान्ति देहिनां सङ्क्षयं क्रमात्॥ ९०॥

अथ मुखनीलीहरणम्—

तिलद्विजीरसिद्धार्थान्[1] पिष्ट्वा क्षीरेण लेपयेत् ॥
यः सप्ताहं, जयेन्नीलीं चन्द्रवद्वदनं भवेत् ॥ ९१ ॥
गैरिकं शोणयष्टी[2] च मेघनादं[3] निशाद्वयम् ॥
पिष्ट्वा रम्भाम्भसा लेपात्सप्ताहं नीलिकां जयेत् ९२

अथ कुचसंस्कारः—

वाजिगन्धावचाकुष्ठकणाश्वारिलवङ्गकम् ।
नवनीताम्बुसंमिश्रं लेपात्कुर्यात्कुचान् पृथून् ॥ ९३॥
कोलमज्जा[4] हयारिश्च भुजङ्गस्य वसा समाः ।
एतेषां मर्दनात्स्त्रीणां कुचाः संयान्ति पीनताम् ॥ ९४॥
श्रीपर्णीरससंसिद्धतिलतैलविलेपनात् ।
पतितावपि सङ्कुर्यात्पीनोत्तुङ्गौ कुचौ स्त्रियाः॥ ९५।
दाडिमीकल्कसंसिद्धकटुतैलविमर्दनम् ॥
स्तनौ चारुतरौ पीनौ नित्यं कुर्यान्मृगीदृशः ॥ ९६॥
तैलं तिलोद्भवं गव्यं घृतं चार्कपयः समम् ।
बला श्यामलता[6] व्योषं लज्जालुश्च निशाद्वयम् ॥ ९७॥

१ द्विजीरम् कृष्णं श्वेतं चेति द्विविधं जीरकम् । २ शोणः शोणकः ।
३ मेघनादः चौलाई इति ख्यातः शाकविशेषः । ४ कोलः वराहः ।
५ श्रीपर्णी शिवणी इति ख्याता । ६ श्यामलता श्यामा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

एतेषां कल्कसहितं पचेन्मृद्वग्निना सुधीः ।
तल्लेपेन कुचाः स्त्रीणां शीघ्रं यान्ति विशालताम्॥ ९८॥
बाला तण्डुलतोयेन तैलमेतत्पिबेद्यदि ।
पीनोत्तुङ्गौ कुचौ तस्या न पतेतां कदाचन ॥९९॥

इति श्रीलाडखानविनोदाय महाकविकल्याणमल्ल-
विरचिते अनङ्गरङ्गे द्रावणादिनिरूपणं
नाम षष्ठं स्थलम् ॥

अथ वशीकरणादिकं निरूप्यते—

सारमुद्धृत्य सङ्क्षेपाद्वशीकरणमोहनम् ॥
कामिनां प्रीतिजननं किञ्चिदत्र निगद्यते ॥ १ ॥

तत्रादौ तिलकविधिः—

लज्जालुर्मधुकं हव्यं[1] नालिनीमूलमेव च ॥
एतत्पिष्ट्वा स्ववीर्येण यः कुर्यात्तिलकं पुमान् ॥२॥
तत्क्षणादेव नयति वशतां भुवनत्रयम् ।
वात्स्यायनेन मुनिना प्रोक्तो योगोऽयमुत्तमः॥३॥
सितार्कमूलं मञ्जिष्ठा वचा कुष्ठं समूलकम् ॥
स्त्रीयोनिशोणितेनैतदेकीकृत्य ललाटके ॥ ४ ॥
शुभं तिलकमाधत्ते यः स लोकत्रयं क्षणात् ।
नयति स्ववशं प्राज्ञः सुचिरं मोदते भुवि ॥ ५ ॥

१ हव्यं घृतम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तगरं पिप्पलीमूलं मेषशृङ्गी[1] कणा जटा[2] ।
एतत्समं स्वपञ्चाङ्गमलैर्नीत्वैकतां[3] सुधीः ॥ ६ ॥
मधुना तिलकं कुर्यात् यः क्षोणीसुतवासरे ।
जगत्सर्वं वशीकुर्यात्स पुमान्नात्र संशयः ॥ ७ ॥
गोरोचनां च सम्भाव्य स्वपुष्परुधिरेण या ॥
कुर्यात्तत्तिलकं भाले सा पतिं मोहयेद्भृशम् ॥ ८ ॥

अथाञ्जनविधिः—

महाष्टमीदिने यत्तु श्मशाने नरमस्तके ।
पातितं कज्जलं विश्वं मोहयेन्नयनाञ्जनात् ॥ ९ ॥
रोचना केसरं कन्या[4] शिला चैभिर्विलोचने ।
योजयेद्दृष्टिपथगं सर्वमेव विमोहयेत् ॥ १० ॥
तालीसकुष्ठतगरैर्लिप्त्वा क्षौमीं सुवर्त्तिकाम् ।
सिद्धार्थतैले निक्षिप्य कज्जलं नरमस्तके ॥ ११ ॥
पातयेदञ्जनात्तस्य सर्वदा भुवनत्रये ।
दृष्टिगोचरमायातः सर्वो भवति दासवत् ॥ १२ ॥
शिलाकिञ्जल्कफलिनीरोचनानां तथाञ्जनात् ।

---

१ मेषशृङ्गी मेढासिङ्गी । २ जटा जटामांसी ।

३ स्वपञ्चाङ्गमलानि—अनामिकाशोणितं, हृदयश्लेष्मा, चक्षुर्मलं, नासिकामलं, बाह्यमलम् इत्येतानि । अथवा स्वेदलालारक्तमूत्रशुक्राणि इति केचित् ।

४ कन्या घीकुवार इति प्रसिद्धा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पुष्यार्कयोगे विहितं दम्पत्योर्मोहनं परम् ॥ ११ ॥ इति ।

अथ चूर्णविधिः— शिर्छे ततो

काकजङ्घा सिता, पक्षौ भ्रामरौ कुष्ठमुत्पल[illegible]मात्रं ॥ १२ ॥

मूलं तगरजं चैषां चूर्णं क्षिप्तं विमोहयेत् ॥ १३ नृपः ।

वात्यान्तिकदलं[1] पुंसो मलं माला शवस्य तु [illegible]तः १४ ॥

पक्षात्रलोरिदं चूर्णं क्षिप्तं शिरसि मोहनम् ॥ १५

सप्तच्छदं शिवाक्षं[2] च सक्षौद्रं[3] तु समांशकम् । [illegible] २ ॥

अमीषां शिरसि क्षिप्तं चूर्णं मोहकरं परम् ॥ १६ ॥

अथ वटिकाभक्षणविधिः—

अन्त्रादि सर्वं निष्काश्य खञ्जरीटोदरं कुजे ।

पूरयित्वा स्ववीर्येण शरावयुगले क्षिपेत् ॥ १७ ॥

मुद्रां कृत्वा तदेकान्ते सप्ताहं धारयेत्सुधीः

पश्चान्निष्काश्य सम्पिष्य वटीं कृत्वा विशोषयेत् ॥ १८ ॥

सा भक्षणविधानेन दीयमाना परस्परम् ॥

दम्पत्योर्मोहजननी कीर्त्तिता वटिकोत्तमा ॥ १९ ॥

अथ लेपविधिः—

यः स्वरेतः समादाय रतान्ते सव्यपाणिना ।

वामपादे स्त्रियो लिम्पेत्सा तस्य वशगा भवेत् ॥ २० ॥

---

१ वात्यान्तिकदलं वात्योद्भ्रान्तपत्रम् । २ शिवाक्षं रुद्राक्षम् ।

३ सक्षौणेयम् इति पुस्तकान्तरे पाठः ।

च

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage Digitization, Sarayu Trust/eGangotri

तगरशेषे कान्तस्य लिङ्गं वामाङ्घ्रिणा स्पृशेत् ।
एतत्सर्वेद्वासः स तस्या नात्र संशयः ॥ २१ ॥
मधुन्यासिन्दूरमधूकैः समभागकैः ॥
जगलिङ्गं भजेद्यां सा वशगा स्याद्वराङ्गना ॥२२॥
गरं सभल्लूकमेढ्रं च मधुना सह ।
[illegible]त्वा लिप्त्वा ध्वजं यां च भजते सा वशीभवेत्॥ २३ ॥
[illegible]चना कनकं शम्भुबीजं कर्पूरचन्दने ॥
[illegible]भिर्विलिप्तलिङ्गो यां भजते सा वशीभवेत् ॥ २४ ॥

अथ धूपः—

चन्दनं कुङ्कुमं व्याधिः कालाङ्गं कुसुमं जलम् ।
देवदारु च सम्पिष्य मधुना सह मिश्रयेत् ॥ २५ ॥
चिन्तामणिरितिख्यातो धूपः परममोहनः ।
एष प्रयुक्तो विधिना सर्वकार्याणि साधयेत् ॥ २६ ॥
एला[2] सर्जरसस्तार्क्ष्यं[4] चन्दनं युवती[5] वचा ।
शृङ्गी[6] चैभिः समैर्धूपात्सर्वं विश्वं विमोहयेत् ॥ २७ ॥

१ व्याधिः कूट इति प्रसिद्धा। व्याघ्री कूष्माण्डकुसुमं जलम् इति लाहोरमुद्रितपुस्तके पाठः। अयमेव पाठः समीचीनो भाति । तत्र व्याघ्री कण्टकारिका। २एला लाइची। ३सर्जरसः राल इति प्रसिद्धः।
४ तार्क्ष्यः सालः। तार्क्ष्यस्तु स्यन्दने वाहे गरुडे गरुडाग्रजे। अश्वकर्णाह्वयतरौ स्यात्, इति हैमः। अश्वकर्णश्च सालतरुः।
५ युवती, वयस्था काकोलीतिख्याता। अथ वा प्रियङ्गूः।
६ शृङ्गी महौषधम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ कामेश्वरीमन्त्रः— ॥ ततः ।

क्लीं प्रोक्त्वामेश्वरेत्युक्त्वा प्रणवादि ततोऽमुकीं ततो

आनयानयेत्येवं वशतां क्लीं ततः परम् ॥ [illegible] ॥१२॥

अयं कामेश्वरो मन्त्रः कदम्बकुसुमैस्सह । [illegible] नृपः ।

पलाशकुसुमैर्वाथ सञ्जप्तोऽयुतसङ्ख्यया ॥ २९ ॥ [illegible] ॥१३॥

तथा दशांशहोमेन सर्वसिद्धिप्रदः स्मृतः ।

अनेन जप्तं पुष्पादि दत्तं परममोहनम् ॥ ३० ॥ [illegible]

अथ चामुण्डामन्त्रः—

ॐ[2]चामुण्डे मोहयाथ वशतां नय चामुकीम् ।

स्वाहापदान्त इत्युक्तश्चामुण्डामन्त्र उत्तमः ॥ ३१ ॥

पलाशकुसुमैरेतल्लक्षं जप्त्वा दशांशतः ।

होमेन वामविधिना सर्वसिद्धिं प्रविदन्ति ॥ ३२ ॥

इतिमन्त्रेण जप्तानि सप्तधा कुसुमानि च ।

दत्तानि वशगां कुर्युः कामिनीं नात्र संशयः ॥ ३३ ॥

अथ पद्मिनीवशीकरणम्—

कामेश्वरपदं पूर्वमोङ्काराद्यथ मोहय ।

स्वाहान्तं क्रमतो मन्त्रं नागवल्लीदले लिखेत् ॥ ३४ ॥

पुष्पेण मधुयुक्तेन रविवारे निमन्त्रितम् ।

---

१ ॐक्लीं कामेश्वर अमुकीं आनय आनय वशतां क्लीम्।इति मंत्रस्वरूपम्।

२ ॐचामुण्डे अमुकीं मोहय वशतां नय स्वाहा। इति मंत्रः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तगरैर्यमानं तत्पाङ्गिरङ्गं शतां नयेत् ॥ ३४ ॥

एतत्र अथ चित्रिणीवशीकरणम्—

मधुद्रुतयं प्रोच्य विहङ्गमपदद्वयम् ॥

जशाय तस्मै च स्वाहेत्यस्त्रं मनोभुवः ॥ ३५ ॥

गजातीफलं रम्भामूलतोयेन भावयेत् ।

ाष्य भानुकिरणैर्नागवल्लीदले क्षिपेत् ॥ ३६ ॥

नेमन्त्र्यानेन मन्त्रेण रविवारे प्रदापयेत् ।

एतद्भक्षणमात्रेण चित्रिणी वशगा भवेत् ॥ ३७ ॥

अथ शङ्खिनीवशीकरणम्—

ॐमोहनश्चोमिति च स्वाहान्तं च पचद्वयम् ।

अयं महासिद्धमन्त्रः कीर्त्तितः पूर्वसूरिभिः ॥३८॥

मन्त्रेणानेन सञ्जप्तं मूलं तगरसम्भवम् ।

श्रीफलं चैव सन्दद्याच्छङ्खिनी वशतां व्रजेत् ॥ ३९ ॥

अथ हस्तिनीवशीकरणम्—

ॐकारो धिरियुग्मं च कामदेवाय चेत्यथ ।

तस्मै स्वाहेतिकथितो मन्त्रः श्रेष्ठो मुनीश्वरैः ॥ ४० ॥

कपोतपक्षं सम्पिष्य मधुनाथ निमन्त्रयेत् ।

---

१ ॐ ॐविहङ्गम विहङ्गम कामदेवाय तस्मै स्वाहा । इति ।

२ जातीफलम् जायफल इति प्रसिद्धम् ।

३ ॐनमश्चोमिति चेति पुस्तकान्तरे पाठः ।

४ ॐधिरिधिरि कामदेवाय तस्मै स्वाहा ॥ इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मन्त्रेणानेन तद्दानाद्भगवान् विशगा भवेत् ॥ [illegible] ।

अथाङ्गरागादिकमुच्यते— [illegible] ततो

संमूर्छितानुरागाणां रत्युत्सवविलासिनाम् । [illegible] ॥१२॥

कामिनां प्रीतिजननमङ्गरागादिकं ब्रुवे ॥ ४२ नृपः ।

चन्दनोशीरपथ्यादिलोध्राम्रत्वक्समुद्भवः । [illegible] ॥४३॥

लेपः स्वेदजदौर्गन्ध्यं हरत्याशु विलासिनाम् ॥ ४३

पथ्या निम्बदलं लोध्रं दाडिमीसप्तपर्णयोः । [illegible] ॥

वल्कलस्य प्रलेपोऽयमङ्गदुर्गन्धिनाशनः ॥ ४४ ॥

चिञ्चाफलं करञ्जस्य बीजैरथ हरीतकी ।

बिल्वमूलेन कक्षादिदुर्गन्धिहरणं द्वयम् ॥ ४५ ॥

नागपुष्पागुरूशीरकोलमज्जाम्बुचन्दनैः ।

लिप्ताङ्गो विनिहन्त्याशु दुर्गन्धं घर्मवारिजम् ॥ ४६ ॥

खगपीलुतरोः पुष्पं तथा जम्बूफलं समम् ।

एतद्देहे निदाघेषु लिप्तं घर्माम्बुनाशनम् ॥ ४७ ॥

पिचुमन्ददलाम्भोजलोध्रदाडिमवल्कलैः ।

निदाघकाले लिप्ताङ्गो घर्मवारिचयं जयेत् ॥ ४८ ॥

शिरीषकेसरोशीरलोध्रैरङ्गविरूक्षणात् ।

---

१ तत्पानात् इत्यपि पाठः । २ पथ्यार्ति इति क्वचित्पाठः ।

३ करञ्जबीजसहितं चिञ्चाफलमित्येको योगः, बिल्वमूलसहिता हरीतकीत्यपरो योगः । ४ नागपुष्पम् नागकेशरः ।

५ कोलं बदरीफलम् । ६ पिचुमन्दो निम्बः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu-Trust/eGangotri

तगरं घर्मांम्बु निर्दिष्टं गन्धं विन्दति ॥ ४९ ॥

एतत्र अथ सुगन्धितैलप्रयोगः—

मधुरं मरुबकमशोककुसुमानि च ।

जम्पाणि केतक्याः क्षिप्त्वा तैले निधापयेत् ॥५०॥

गन्धशुष्कपुष्पाणि ततो निष्काशयेन्नरः ।

परिमलं तैलं ख्यातं योग्यं विलासिनाम् ॥ ५१ ॥

अथ स्नानीयसुगन्धिप्रयोगः—

एलाम्बुदनखैस्वर्णमांसीकर्पूरपत्रकैः ।

स्नात्वा सुगन्धिं परमं मूर्द्धजानां प्रविदन्ति ॥ ५२ ॥

धात्रीस्वर्णघनोशीरपथ्यामांसीविलेपनैः ।

स्नात्वा मासार्द्धमाधत्ते केशसौरभ्यमुत्तमम् ॥ ५३ ॥

अथ सामान्यसुगन्धिप्रयोगः—

चन्दनैलाशटीपत्रशिग्रुपथ्याम्बुतोयदैः ॥

समानैर्लेप उक्तोऽयं सुगन्धिः कामिवल्लभः ॥५४॥

कर्पूरं कुङ्कुमं लोध्रं स्थौणेयं जलमम्बुदः ।

उशीरं च समैरेभिर्लेपः स्यात्सुरभिः परः ॥ ५५ ॥

---

१ मरुबको जम्बीरः । २ अम्बुदः मुस्ता । ३ नखं नखीतिप्रसिद्धम् । ४ स्वर्णम् नागकेशरः । ५ क्वचित् कर्चूर इति पाठः । कर्चूरः कचूर इति ख्यातः । ६ घनः मुस्ता । ७ विलेपनं चन्दनम् । ८ शटीपत्रं कर्चूरपत्रम् । ९ शिग्रुः सौभाञ्जनम् । १० स्थौणेयं गांठेवन इति ख्यातम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

पत्राम्बुचन्दनोशीरकृष्णागुरुवर्तिमुद्भवः । ति ॥ ति: ।
लेपः कृतोऽयमङ्गेषु सौरभ्यं परमं दिशेत् दिशिर्छ ततो

अथ सर्वोत्तमसुगन्धिप्रयोगः— क्रमात् ॥१२॥

कस्तूरी नागकुसुमं शैलेयं चन्दनं घनः । ३ नृपः ।
श्रीवासः[1] कनकः[2] चन्द्रो[3] जाती स्थौणेयपूतिकौ[4] ॥ एतः १३॥
सुश्लक्ष्णपिष्टैरेभिस्तु नागवल्लीदलोद्भवैः ।
रसैर्लेपः सुगन्धोऽयमुक्तो योग्यो महीभुजाम् ॥ ५८ ॥
स्यात्तोयदस्य भागैकं पथ्याभागचतुष्टयम् ।
व्याधिस्थौणेयचन्द्राणां प्रत्येकं भागयुग्मकम् ॥ ५९ ॥
शिलात्मजस्य पञ्चस्युर्नत्र भागा नखस्य तु ।
एभिरुक्तः सुगन्धोऽयं कस्तूरीदलसंज्ञकः ॥ ६० ॥
नखपथ्याभयाम्भोदमांसीमिसिकरञ्जकाः[5] ।
समाः स्वर्णाम्भसोरुक्तं प्रत्येकं भागयुग्मकम् ॥ ६१ ॥
कर्पूरागुरुकस्तूरीजातीस्थौणेयकस्य तु ।
भागत्रिकं स्यात्प्रत्येकं सर्वैरेभिरिहोच्यते ॥ ६२ ॥
लेपः सौरभ्यगर्भाख्यः सर्वलोकमनोरमः ।
भूभुजामेव योग्योऽयमन्येषां दुर्लभः स्मृतः ॥ ६३ ॥

---

१ श्रीवासः धूपविशेषः । २ कनको नागकेशरः । ३ चन्द्रः कर्पूरः ।
४ पूतिकः करञ्जभेदः । ५ अभयम् उशीरम् ।
६ मिसिः शतपुष्पा सौंफ इति ख्याता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तगरं अथ मुखलिङ्गं जयः—

एतत् नखस्वर्णजातीभिः कारयेद्वटीम् ।
मधुयुक्ता सा भुक्ता वक्त्रं सुरभितां नयेत् ॥ ६४ ॥
जङ्घालमजा च स्थौणेयं जातिसस्यकम् ।
गौ मधुनैतेषां कृता वक्त्रं सुवासयेत् ॥ ६५ ॥
राकिञ्जल्ककुष्ठानां चूर्णं लीढं हि सन्ध्ययोः ।
पूरगन्धि वदनं कुर्यान्मासार्धतो ध्रुवम् ॥ ६६ ॥
काम्बोजीबीजकुष्ठोत्थं चूर्णं मधुघृतान्वितम् ।
यो लेढि मासं तद्वक्त्रं मासं कुसुमवद्भवेत् ॥ ६७ ॥
आम्रपत्ररसे क्षारं मार्गवृक्षभवं क्षिपेत् ।
संशोष्य भानुकिरणैर्भक्षेत्ताम्बूलमध्यगम् ॥ ६८ ॥
प्रातः प्रतिदिनं यस्तु सुगन्धि स्यात्तदाननम् ।
सर्वेषु मुखवासस्य योगेष्वयमनुत्तमः ॥ ६९ ॥

इति श्री लाडखानविनोदाय महाकविकल्याणमल्ल-
विरचिते अनङ्गरङ्गे वशीकरणादिनिरूपणं
नाम सप्तमं स्थलम् ।

अथ विवाहाद्युद्देशः—

विद्याशौर्यविवेकधैर्यसहिते शुद्धे स्वधर्मस्थिते
विख्याते धनधान्यवैभवयुते जाता समाने कुले ॥

---

१ जातिसस्यकम् जाइपत्रीति ख्यातम् ।
२ मुरा तालीसपत्रम् । ३ काम्बोजी माषपर्णी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कन्या दोषविवर्जिता गुणवती सभ्रःगच्छति ॥ ातः ।
सद्भिःशास्त्रविधानतःस्मरकलायोग्या वादेशिर्छ ततो

अथ कन्याशुभलक्षणानि—क्रमात् ॥१२॥

नीलाम्भोरुहपत्रकान्तिरथ वा स्वर्णप्रभासुन्दरी नृपः ।
भृङ्गीनीलशिरोरुहा शशिमुखी सारङ्गशावेक्षणा ॥१३॥
स्याद्यस्याश्च तिलप्रसूनसदृशी नासा सुदन्तावला
सुश्रोत्रा पिकभाषिणी च जलजग्रीवाथ बिम्बाधरा ॥२॥
चक्राद्याङ्कितशोणपाणिचरणा क्षामोदरी स्वल्पभुक्
रम्भास्तम्भमनोरमोरुयुगला श्रोण्या बृहत्यान्विता ॥
नाभ्या चैव सुनिम्नया गजगतिः शान्ताल्पनिद्रान्विता
शीलाढ्या सुकुमारिका नरवरैः कन्या विवाह्या सदा॥३।

अथ कन्यादुष्टलक्षणानि—

क्रूरा पिङ्गलकेशलोचनवती खर्वातिदीर्घा कृशा
लम्बोष्ठी पृथुकन्धरातिबहुभुक् श्यामाधरा दन्तुरा ॥
वाचाला विषमस्तनी द्रुतगतिः शूर्पश्रवाः कोपिनी
रूक्षा पल्लवजिव्हिकातिकठिना सश्मश्रुका लोमशा॥४॥
निद्रोद्रेकवती सदाथ वचने यस्याः प्रकम्पोऽधरे

१ जलजः शङ्खः ।
२ चलने यस्याः प्रकम्पोऽवनेः इति लाहोरमुद्रितपुस्तके ऽन्यपुस्तके च पाठः । रतिरहस्ये च-भ्रमणविधिषु यस्याः कम्पते क्ष्मातलं वा इति ।

छ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तर्गौ अथङ्गितौ प्रभवतो गण्डौ भृशं चञ्चलौ ॥
एतत्र नखा भवेत्तदुपगा पादे तथाऽनामिका
मध्यं धरणीं स्पृशेदथ भवेन्मध्या तु हीनाग्रका॥५॥
जङ्घा गिरिपक्षिभूरुहनदीनक्षत्रसंज्ञा च या
रोगसमाकुला च सरलभ्रूवल्लरी निस्त्रपा ॥
गण्डौ कूपसमन्वितौ च दधती हीनाधिकाङ्गी तथा
दुःशीला च विवाहकर्मणि सदा त्याज्याऽबला पण्डितैः६।

अथा जामातृसल्लक्षणानि—

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा७
विद्याशौर्यधनाश्रयो गुणनिधिः ख्यातो युवा सुन्दरः
स्वाचारः सुकुलोद्भवो मधुरवाग्दाता दयासागरः ।
भोगी भूरिकुटुम्बवान्स्थिरमतिः पापार्त्तिहीनो बली
जामाता परिवर्णितः कविवरैरेवंविधः सत्तमः ॥८॥

अथ जामातृदूषणानि—

वृद्धो दुर्व्यसनो दयाविरहितो रोगी महापापवान्
षण्ढो दुष्टकुलोद्भवश्च पिशुनो द्यूतेऽतिबद्धस्पृहः ।

---

१ तदुपगा प्रदेशिनी ।
२ अज्ञाता अज्ञातनामिका ।
३ नक्षत्रवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । इति मनूक्तेः ।
४ धूर्तोऽपि० इति पाठान्तरम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

निर्वित्तः कृपणोऽतिचञ्चलमतिर्निस्सृगच्छति ॥ ...तः ।
भिक्षुः स्नेहविवर्जितः सुमतिभिः ...ति प्रदेशैर्छ तत्रो
(अथातः सम्प्रवक्ष्यामि सुभगं पुरुषं...क्रमात् ॥१२॥
सामुद्रिकं त्विदानीं च सलक्षणमनुत्तमम् ...नृपः ।
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमेव च । ...एतः १३॥
आयुर्हीननरस्त्रीणां लक्षणैः किं प्रयोजनम् ॥
तत्रादौ पुरुषसामुद्रिकलक्षणं कथ्यते—
कनिष्ठाङ्गुलिमूलाच्च रेखा गच्छति तर्जनीम् ।
अविच्छिन्नानि वर्षाणि शतमायुर्विनिर्दिशेत् ॥
कनिष्ठाङ्गुलिमूलाच्च रेखा गच्छति मध्यमाम् ।
अविच्छिन्नानि वर्षाण्यशीतिरायुर्विनिर्दिशेत् ॥
कनिष्ठाङ्गुलिमूलाच्च रेखा गच्छत्यनामिकाम् ।
अविच्छिन्नानि वर्षाणि षष्टिमायुर्विनिर्दिशेत् ॥
रेखाभिर्बहुभिः क्लेशः स्वल्पाभिर्धनहीनता ।
रेखाचतुष्टये सौख्यं बहुरेखा दरिद्रता ।
अङ्गुष्ठोदरमध्यस्थो यवो यस्य विराजते ॥
उत्पन्नभक्ष्यभोगी तु स नरः सुखमेधते ॥
न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
न दीर्घबाहुमैश्वर्यं न मांसोपचितं सुखम् ॥

१ इत आरभ्य–'इति स्त्रीसामुद्रिकलक्षणम्' इत्यन्तो ग्रन्थो लाहोरमुद्रितपुस्तके नास्ति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तस्मै अन्नभोगी शिरोविशालो नृपपुङ्गवश्च ।
एतत्र नक्का, वदारः पादौ विशालौ सततं सुखी स्यात्।
मधुरौ हस्तौ पादौ चाध्वानि कोमलौ ॥
जङ्घे च पादौ च स नरः सुखमेधते ॥
ह्रस्वलिङ्गेन दारिद्र्यं स्थूललिङ्गेन दुःखितः ।
दीर्घलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥

इति पुरुषसामुद्रिकलक्षणं समाप्तम् ।

अथ स्त्रीसामुद्रिकलक्षणं कथ्यते—

मातरं पितरं वापि भ्रातरं देवरं तथा ।
भर्त्तुर्विनाश्रया नारी लक्षणै रहिता तथा ।(?)
चक्रं पद्मं ध्वजं छत्रं स्वस्तिकं कमलं तथा ॥
यासां पादेषु दृश्यन्ते ज्ञेयास्ता राजयोषितः ॥
यस्यास्तु चरणे रेखा तर्जनीं सा प्रयाति चेत् ।
भर्त्तारं लभते शीघ्रं प्रिया भर्तुश्च जायते ॥
यस्या न स्पृशते भूमिमङ्गुली च कनिष्ठिका ।

१ अत्र सामुद्रिकशास्त्रे—चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचः स्नेहेन शय्यावान् पादस्नेहेन वाहनम् ॥ इत्यधिकमपि वर्तते ।

२ वज्रकं तथा इति सामुद्रिके पाठः । वधर्मानकम् इति वीरमित्रोदयस्य लक्षणप्रकाशे स्त्रीलक्षणप्रकरणे ।

३ यस्याः पादतले रेखा तर्जनीमेति चोर्ध्वगा इति सामुद्रिके पाठः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भर्त्ता च म्रियते पूर्वं सा जारं प्रतिगच्छति ॥ ततः ।
अङ्गुलीश्च व्यतिक्रम्य यस्या याति प्रदेशिनी ततो
कुमारी रमते जारं यौवने चैव का कथा ॥ १२ ॥
पीनौ स्तनौ घनौ स्निग्धौ[1] वुरो रोमविवर्जितम् नृपः ।
हस्तिनासेव जङ्घे च यस्यास्सा लभते सुखम् ॥ १३ ॥
यस्याः पयोधरे वामे ह्यसितं तिलकं भवेत् ।
कर्णे कण्ठे सुपुत्रा च सा कन्या सुखदायिनी ॥
ग्रीवया[2] दीर्घया क्रूरा दरिद्रा ह्रस्वया तथा ।
यस्या ग्रीवा सुवृत्ता स्याद्रेखात्रयसमन्विता[3] ॥
यस्याः पाणितले रेखा प्राकारस्तोरणं तथा ।
अपि दासकुले जाता नरेन्द्रं लभते पतिम् ॥
अङ्कुशं कुन्तलं चक्रं यस्याः पाणितले भवेत् ।
पुत्रं प्रसूते सा नारी नरेन्द्रं लभते पतिम् ॥
अदत्तां वर्णहीनां च लक्षणैः परिवर्जिताम् ।
न तां परिणयेत्साधुः सामुद्रिकवचो यथा ॥
मातरं पितरं वापि भ्रातरं देवरं पतिम् ।

१ स्निग्धौ शिरारोमविवर्जितौ इति सामुद्रिके पाठः ।
२ ग्रीवया लम्बया चण्डी दरिद्रा ह्रस्वया पुनः इति पाठः सामुद्रिके ।
३ सामुद्रिके एतदुत्तरार्धम्-दक्षिणावर्तसङ्काशा सा सौभाग्याधिका भवेत् । इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हन्यात्कुलक्षयं तेन नारदेन प्रभाषितम् ॥
एतद्इति स्त्रीसामुद्रिकलक्षणं समाप्तम् ।)

मधुरः— अथ परस्त्रीगमननिषेधः—

जनुःक्षतिर्विकलतात्युपहास्यता च
नन्दार्थहानिलघुता विगतिः परत्र ॥
स्यादेव यद्यपि रतेन पराङ्गनायाः
प्राहुस्तथाप्यनघमित्यपि कारणेन ॥१०॥
लङ्केश्वरो जनकजाहरणेन बाली
तारापहारकतयाप्यथ कीचकश्च ॥
पाञ्चालिकाग्रहणतो निधनं जगाम
तच्चेतसापि परदाररतिं न कुर्यात् ॥११॥

अथ कारणवशात्परस्त्रीगमनस्यानघत्वमुच्यते—

दृष्टिप्रेम पुरा भ्रमोऽथ मनसि प्रोक्तोऽथ सङ्कल्पको

---

१ हन्यात्कुलक्षणैरेभिस्तस्मल्लक्षणमीक्षयेत् । इति सामुद्रिके पाठः ।

२ अतः परम्–अथ ज्योतिषप्रकरणं लिख्यते । तत्र वधूवरयोर्मेलनविचारः । अथ गुणानां मेलनत आनयनम् । अथ वर्णविचारः । अथ वश्यम् । अथ तारा । अथ योनिविचारः । अथ ग्रहमैत्री । अथ गणविचारः । अथ कूटविचारः । अथ नाडीविचारः । इति वधूवरयोर्मेलनगुणविचारः । इत्यधिकपाठः पुस्तकान्तरे वर्तते ।

३ अत्र 'चक्षुःप्रीतिर्मनःसङ्गः सङ्कल्पोत्पत्तिर्निद्राच्छेदस्तनुता विषयेभ्यो व्यावृत्तिर्लज्जाप्रणाश उन्मादो मूर्छा मरणमिति तेषां लिङ्गानि' इति वात्स्यायनात् 'दृष्टिप्रेम पुरा ततश्च मनसः सङ्गोऽथ' इति समुचितेन पाठेन भाव्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

निद्रोच्छित्तिरतः शरीरतनुता लज्जाविनाशस्ततः ।
वैराग्यं विषयेष्वथो निगदिते उन्मादमूर्छे ततो
मृत्युः स्यादिति पण्डितैः स्मरदशा उक्ता दशैवं क्रमात् ॥१२॥
उर्वशीसुरतचिन्तया ययौ सङ्क्षयं किल पुरूरवा नृपः ।
रक्षणाय निजजीवितस्य तत्सम्भजेत्परवधूं न कामतः ॥१३॥
नारी चोन्नतयौवनाभिलषितं कान्तं न चेदाप्नुया-
दुन्मादं मरणं च विन्दति तदा कन्दर्पसंमोहिता ।
सञ्चिन्त्येति समागतां परवधूं रत्यर्थिनीं स्वेच्छया
गच्छेत्कापि न सर्वदा सुमतिमानित्याह वात्स्यायनः॥१४॥
अपि द्विजश्रोत्रियभूपमित्रसम्बन्धिभार्या यदि पञ्चभुक्ताः ।
स्युस्ताश्च दोषाय न तत्र गच्छेद्धेतौ पुमान्कामत एव नैव।१५।

अथागम्याः स्त्रिय उच्यन्ते—

कन्या प्रव्रजिता सती रिपुवधूर्मित्राङ्गना रोगिणी
शिष्या ब्राह्मणवल्लभा च पतितोन्मत्ता च सम्बन्धिनी ॥
वृद्धाचार्यवधूश्च गर्भसहिता ज्ञाता महापापिनी
पिङ्गा कृष्णतमा सदा बुधजनैस्त्याज्या इमा योषितः।१६।

अथ दूत्य उच्यन्ते—

मालाकारवधूःसखी च विधवा धात्री नटी शिल्पिनी
सैरन्ध्री प्रतिगेहिकाथ रजकी दासी च सम्बन्धिनी ।
बाला प्रव्रजिता च भिक्षुवनिता तक्रस्य विक्रेतिका

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

मान्या कारुवधूर्विदग्धपुरुषैः प्रेष्या इमा दूतिकाः ॥१७॥

अथ सुखसाध्यालक्षणानि—

निर्लज्जा विधवा कलासु कुशला गोष्ठीपरा दुर्भगा
स्त्रीबस्थूलकठोरवामनजरद्वैरूप्यभार्या तु या ।
द्वारावस्थितिशीलिकातिचपला बन्ध्या महामानिनी
प्रत्यग्रा तरुणी महाविरहिणी साध्याः सुखेनाङ्गनाः॥१८॥

अथानुरागिणीलक्षणानि—

लज्जां न धत्तेऽभिमुखं न पश्ये-
त्पादेन भूमिं विलिखेत्स्थिता च ॥
व्यनक्ति गात्रं कुरुते च हास्यं
दृष्ट्वा कटाक्षं नयने विदध्यात् ॥ १९ ॥

पृष्ट्वा स्फुटं सस्मितमेव वाक्यं
शनैर्व्रजेच्चानुसरेदव्रजन्तम् ।
विलोक्य तं व्याजकथाप्रसङ्गा-
दुच्चैर्वदेत्स्वं परिदर्शयन्ती ॥ २० ॥

तन्मित्रवर्गे प्रणयं विदध्यादित्यादिवार्त्तामसकृच्च पृच्छेत् ।
कति स्त्रियोऽस्यालयगाःसुरूपाःकस्यामयं प्रेम भृशं विधत्ते२१
मृद्नाति दृष्ट्वा स्वकुचं करेण संस्फोटयेदङ्गुलिकाःसजृम्भम्।
भूषाविहीना न ददाति तस्मै स्वदर्शनं याचितमप्यजस्रम्२२
पुष्पादिना हन्ति तथातितारं सङ्कासयेन्मार्ष्टि भुजं करेण।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

व्याजेन गच्छेत्सदनं कराङ्घ्रिवक्त्रेषु घर्माम्बु वहेद्विलोक्य २३
इत्यादिचिह्नैरनुरागयुक्तां ज्ञात्वा विदग्धां मृगशावकाक्षीम्॥
सम्प्रेषयेत्तां प्रति निर्विशङ्कं दूतीमलं कामकलाप्रवीणः २४

अथ दुःसाध्यालक्षणानि—

भर्तृस्नेहवती दृढैकवनिता प्रेम्णा विहीना भृशं
सेर्ष्या भूरिसुता त्रपाभरयुता गुर्वादिभीता स्थिरा ॥
प्रायेणार्थवती तथा परजनालापे विरक्ता सदा
निर्लोभा व्यभिचारकर्मणि बुधैर्दुःखेन साध्या स्मृता॥२५॥

अथ सुरते त्याज्यस्थानानि—

वह्निब्राह्मणपूज्यवर्गनिकटे नद्यां च देवालये
दुर्गादौ च चतुष्पथे परगृहेऽरण्ये श्मशाने दिवा ॥
सङ्क्रान्तौ शशिसङ्क्षये[1] च शरदि ग्रीष्मे ज्वरार्त्तौ व्रते
सन्ध्यायां च परिश्रमेषु सुरतं कुर्यान्न विद्वान् क्वचित॥२६॥

अथ सुरते विहितप्रदेशाः—

विस्तीर्णे ललिते सुधाधवलिते चित्रादिनाऽलङ्कृते
रम्ये प्रोन्नतचत्वरेऽगुरुमहाधूपादिपुष्पान्विते ॥
सङ्गीताङ्गविराजिते स्वभवने दीपप्रभाभासुरे
निःशङ्कं सुरतं यथाभिलषितं कुर्यात्समं कान्तया॥२७॥

इति श्रीलाडखानविनोदाय महाकविकल्याणामल्लविरचिते अनङ्गरङ्गे विवाहाद्युपदेशनिरूपणं नाम अष्टमं स्थलम् ।

१ शशिसङ्क्षये अमावास्यायाम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ बाह्यसम्भोगविधानम्—

मतिमानुपभोगपूर्वकं सुरतं संविदधीत कान्तया ॥
परिरम्भणमेव पण्डितैः प्रथमं तेषु निगद्यतेऽष्टधा ॥१॥
वृक्षाधिरूढं तिलतण्डुलाख्यं लालाटिकं जाघनविद्धके च ।
ऊरूपगूढाह्वयदुग्धनीरे तत्राष्टमं वल्लरिवेष्टितं स्यात् ॥२॥

अथ परिरम्भलक्षणानि—

चरणकमलमेकेनाङ्घ्रिणाक्रम्य भर्त्तु-
रपरपदसरोजेनाश्रयन्ती तदूरुम् ॥
तरुमिव भुजवल्ल्याऽऽवेष्ट्य चुम्बेन्नताङ्गी
कथितमिह मुनीन्द्रैस्तद्धि वृक्षाधिरूढम् ॥ ३ ॥
भुजगुह्यविपर्ययं मिथो घटयेच्चेन्मिथुनं सुनिश्चलम् ॥
तिलतण्डुलसंज्ञकं तदा परिरम्भं कथयन्ति सूरयः ॥४॥
मिथो ललाटाक्षिकपोलवक्त्रहृद्बाहुबल्लीमिथुनं घटेत ॥

---

१ अत्र गुह्यपदमूरूपलक्षकं बोध्यम् । एवंच भुजविपर्यय ऊरुविपर्ययश्चेत्यर्थः । तथाच कामसूत्रम्—शयनगतावेवोरुव्यत्यासं भुजव्यत्यासं च ससङ्घर्षमिव घनं संस्वजेते तत्तिलतण्डुलकम् । (अधि० २ । अध्या० २ । प्रक० २ । सू० १९ ।)इति । भुजसक्थिविपर्ययमिति पाठः समीचीनो भवेत् ।

२ वक्त्रमासज्य हन्यान्मिथुनं सभावम् । इति लाहोरमुद्रितपुस्तके पाठः । अयं पाठः साधीयान् भाति । तथाच वात्स्यायनसूत्रम्-मुखे मुखमासज्याक्षिणी अक्ष्णोर्ललाटं ललाटेन हन्यात्सा ललाटिका । (अधि० २ । अध्या० २ । प्रक० २ । सू० २७ ।) इति । अत्र अलङ्कारार्थे 'कर्णललाटात्कनलङ्कारे' (४।३।६५) इति सूत्रेण कन्प्रत्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या ११)

आलिङ्गनभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १२)

चुम्बनाप्रशस्तस्थानचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

रसातिरेकाद्यदि निस्तरङ्गं लालाटिकं तत्प्रवदन्ति सन्तः॥५॥

जघनपरिसरस्थं श्रोणिदेशं स्वभर्तु-
र्निजभुजलतिकाभ्यां गाढमालिङ्ग्य रागात् ॥
चलितवसनकेशा चुम्बनं यत्र कुर्यात्
स्फुटमिह परिरम्भं जाघनं तं वदन्ति ॥ ६ ॥

स्थितं पतिं मीलितनेत्रयुग्मं
पश्चात्प्रविध्येद्वनिता कुचाभ्याम् ॥
गृह्णात्यसौ तामपि विद्धकाख्य-
मालिङ्गनं तन्मुनिभिः प्रदिष्टम् ॥ ७ ॥

उद्दामकामोन्मथितोऽङ्गनाया
ऊरुद्वयं स्वोरुयुगेन यत्र ॥
आपीडयेत्कान्त उदीरितं त-
दूरूपगूढं परिरम्भणं हि ॥ ८ ॥

अङ्केऽथ तल्पे निजसम्मुखस्थां
कान्तां समालिङ्गति यत्र कान्तः ॥
मिथः प्रवेशं कुरुतो निजाङ्गैः

यविधानेन निष्पादितो ललाटिकाशब्दः शिरोभूषणवाची । सादृश्यादुपगूहने तदुपचारः । सङ्क्रान्तिविशेषेण नायकललाटस्यालङ्क्रियमाणत्वात् । लालाटिकम् इति तु स्वार्थिकाण्प्रत्ययान्तो ललाटिकाशब्द एव न तु 'संज्ञायां ललाटकुक्कुट्यौ पश्यति'(४।४।४६) इति ठक्प्रत्ययेन निष्पादितः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

स्यात्क्षीरनीरं[1] परिरम्भणं तत् ॥ ९ ॥
वल्लीव वृक्षं सरलाङ्गयष्टिं पतिं
समालिङ्गति यत्र कान्ता ॥
चुम्बेच्च रागात्कृतमन्दसीत्का
प्रोक्तं बुधैर्वल्लरिवेष्टितं तत् ॥ १० ॥

अथ चुम्बनभेदाः—

अधराक्षिकपोलमस्तकं[2] वदनान्तः स्तनयुग्मकन्धरे[3] ॥
विहितानि पदानि पण्डितैः परिरम्भादनु चुम्बनस्य हि ॥ ११ ॥
कक्षायुगं मन्मथमन्दिरं च
नाभेश्च मूलं स्मरलोलचित्ताः ॥
चुम्बन्ति लाटा निजदेशसात्म्या-
न्न त्वन्यतश्चुम्बनरीतिरेषा ॥ १२ ॥

---

१ रतिरहस्ये—
अभिमुखमुपविष्टा योषिदङ्केऽथ तल्पे
रचितरुचिरगाढालिङ्गनो वल्लभश्च ॥
प्रसरदसमरागावेशनश्यद्विचारौ
विशत इव मिथोऽङ्गे क्षीरनीरं तदाहुः ॥ इति । (परि० ६ आलिङ्गनाधिकारे श्लो० ९)

२ प्राण्यङ्गत्वादेकवद्भावः ।

३ साम्प्रतं यद्यपि स्तनचुम्बनमनुचितं गर्ह्यं च मन्यते । तथाप्यत्र तदुक्तिः काचित्कदेशानुसारेण बोध्या । अत एवोक्तं वात्स्यायनेन—"रागवशाद्देशप्रवृत्तेश्च सन्ति तानि तानि स्थानानि न तु सर्वप्रयोज्यानि" । इति (अधि० २ अध्या० ३ प्रक० ३ सू० ८) ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

SREEVITS.

Multi-Vitamin-Mitieral (Sugar Coated) Tablets

ntaining :

8 Vitamins : A, B_1, B_2, B_6, C, D, Nicotinic Acid, and 4 Minerals . Iron, Calcium, Phosphorus, Manganese etc.

SREEVATSA CHEMICALS & DRUGS LTD.,
P. B. NO. 1787, MADRAS-1.

Bhagavad Ramanuja National Research Institute, Melukote Colle

nding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGang

nagavad Ramanuja National Research Institute, Melukote C

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

नारीमुखान्ते वदनं स्वकीयं
समानयेद्यत्र बलेन कान्तः ॥
सा नैव चुम्बेदतिकोपयुक्ता
स्याच्चुम्बनं तन्मिलिताभिधानम्[1] ॥ १३ ॥

दयितस्य निवेश्य वक्त्रके निजवक्त्रं परिचुम्बिताधरम् ॥
न पिबेदबला तदाननं स्फुरिताख्यं किल चुम्बनं तदा ॥ १४ ॥

करेण कान्तस्य निमील्य नेत्रे
जिह्वां मुखान्तर्विनिधाय यत्र ॥
चुम्बेद्विलोला परिमीलिताक्षी
तद्वन्दिकाख्यं[2] कवयो वदन्ति ॥ १५ ॥

करेण कान्ताचिबुकं गृहीत्वा
दशेत्पतिः पश्चिमभागवर्त्ती ॥
प्रियाधरं यत्र तु तिर्यगाख्यं
प्रोक्तं कवीन्द्रैः खलु चुम्बनं तत् ॥ १६ ॥

दन्तैर्गृहीत्वा मदनाभिलोलाधरं विचुम्ब्याशु दशेत्स्वभर्त्तुः ॥
कान्तस्तदीयं कथितं मुनीन्द्रैरित्युत्तरोष्ठं परिचुम्बनं हि १७
आदाय दन्तच्छदमाशु पत्युः कराङ्गुलीसम्पुटकेन नारी ।

---

१ एतदेव वात्स्यायनेन निमितपदेनोच्यते ।
२ वात्स्यायनेन घट्टितमित्युच्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

जिह्वाग्रदेशेन घटेद्दशेच्च तच्चुम्बनं पीडितसंज्ञकं स्यात् १८॥
प्रियाधरं स्वाधरसम्पुटेन पिबेत्पतिः सापि तथैव भर्त्तुः॥
परस्परं प्रेमरसातिरेकात्स्याच्चुम्बनं सम्पुटकं तदेव ॥१९॥
सम्प्राप्तनिद्रां रहसि स्वकान्तां चिरागतश्चुम्बति यत्र भर्त्ता।
प्रोक्तं कवीन्द्रैः प्रतिबोधसंज्ञं तच्चुम्बनं सर्वरसातिरेकम्।२०।
अधरोष्ठयुगेन कामिनी पतिवक्त्रौष्ठयुगं स्वजिह्वया ॥
परिपीड्य विचुम्ब्य नृत्यति कथितं तद्धि समौष्ठसंज्ञकम्।२१।

अथ नखदानविधानम्—

ग्रीवाकरोरुजघनस्तनपृष्ठकक्षा-
हृत्पार्श्वगण्डविषये नखराः खराः स्युः ॥
माने नवीनसुरते विरहे प्रवासे
द्रव्यक्षयेऽथ विरतौ च मदे प्रयोज्याः॥ २२ ॥
नीरेखता निर्मलतोज्ज्वलत्वं
बर्द्धिष्णुताथास्फुटितत्वमेव ॥
अमार्दवं चेति गुणा नखानां
बुधैः षडुक्ताः किल कामशास्त्रे ॥ २३ ॥

---

१ इदमेव कामसूत्रे अवपीडितकमुच्यते। तथा च वात्स्यायनः— अङ्गुलिसम्पुटेनैव पिण्डीकृत्य निर्दशनमोष्ठपुटेनावपीडयेदित्यवपीडितकं पञ्चममपि करणम् इति। (अधि० २। अध्या० ३। प्रक० ३। सू० १४।)

२ तत्सम्पुटाख्यं हनुवत्प्रसंज्ञं स्यात्केलिजिह्वाननतस्तदेव। इति पुस्तकान्तरे पाठः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १३)

चुम्बनभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १४)

नखप्रहारभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

यत्कर्म सम्पूर्णनखप्रसूतं विज्ञास्तदेव च्छुरितं वदन्ति ॥२४॥

ग्रीवाकुचे वक्रनखप्रहारो
दत्तोऽर्द्धचन्द्राख्य उदीरितोऽसौ ॥
इत्येव भेदोऽभिमुखे प्रयोज्य-
स्तदा बुधा मण्डलकं वदन्ति ॥ २५ ॥
द्वित्र्यङ्गुलादधिक एव नखप्रहारो
मूर्धोरुगुह्यकुचदेशसमर्पितो यः ॥
रेखाद्वयं मदनकलिकलाविधिज्ञाः
प्राहुस्तमेव तरुणीविहितप्रभावाः ॥ २६ ॥

रेखा कृता सर्वनखैरधस्तादङ्गुष्ठमाधाय तु चूचुके या ॥
मयूरपादं किल तां वदन्ति शशप्लुतं सर्वनखैः कुचाग्रे २७
रेखात्रयं पृष्ठकुचेऽथ गुह्ये कृतं भवेदुत्पलपत्रवद्यत् ॥
अन्वर्थसंज्ञं प्रवदन्ति तद्धि स्मर्तुं प्रवासावसरे दिशन्ति २८

नखं प्रयुक्तं प्रणयाद्रसज्ञै-
र्यदेतदेतत्रास्ति मनोभवस्य ॥
सर्वस्वमत्यन्तसुखैकहेतु-

---

१ इत्येव चेदाशु मुखं प्रयुञ्ज्यात् इति अ०पु०पाठः। "तावेव द्वौ परस्पराभिमुखौ मण्डलम्"। इति वात्स्यायनः। (अधि० २। अध्या० ४। प्रक० ४। सू० १५।)

२ एतद्व्यतिरेकेण नखच्छेद्यविधानं रतिरहस्ये कामसूत्रे चाभिहितम्। रेखा घनास्त्रिचतुरा जघने स्तने वा स्मर्तुं प्रवाससमये विदधुर्विदग्धाः। इति रतिरहस्ये। (परि० ६ श्लो० ६)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

नातोऽस्ति किञ्चिद्वरकामिनीनाम् ॥ २९ ॥

अथ दशनविधानम्—

नखप्रदेशेषु रदाः प्रयोज्या ओष्ठाननान्तर्नयनानि हित्वा ॥
हिङ्कारसीत्कारविशेष उक्तो दन्तार्पणे कामकलाविधिज्ञैः। ३०

रागस्पृशः स्निग्धतराः समाना
घनाश्च सूक्ष्माः सशिखाः सभासः ॥
दन्ताः प्रशस्ता अथ खर्वरूक्षाः
करालबाह्या मलिनाश्च निन्द्याः ॥ ३१ ॥

अधरस्थितरागमात्रगं रदलेख्यं किल गूढकं विदुः ॥
दशनच्छदगण्डपीडनादिदमुच्छूनकमुच्यते बुधैः ॥३२॥

दन्तोष्ठयोर्योगविशेषसाध्यः प्रवालपूर्वो मणिरेष उक्तः ॥
अभ्यासयोगेन स दम्पतीभ्यां संसाध्यते नान्यविनोदतस्तु ३३।

अधरे तिलके च कामिना रदयुग्मेन विखण्डने कृते ॥
इति बिन्दुरुदीरितोऽखिलैर्दशनैः स्यात्किल बिन्दुमालकः ३४

कपोलवक्षोगलभालदेशे खण्डाभ्रकं स्याद्दशनाग्रलेख्यम् ॥
तन्मण्डलाकारकमङ्गनानामङ्गेषु शोभां लभते नितान्तम् ३५

अखर्वसान्द्रा दशनावली या कान्ताशरीरे क्रियते स्वभर्त्रा ॥

---

१ अत्र ओष्ठमुत्तरौष्ठम् । आननान्तः जिह्वामित्यर्थः । तथाच वात्स्यायनः—उत्तरोष्ठप्रान्तर्मुखं नयनमिति मुक्त्वा चुम्बनवद्दशनरदनस्थानानि । इति । (अधि० २ । अध्या० ५ । प्रक० ५ । सू० १)

२ इत्थमेव पाठः सर्वपुस्तकेषु । तिलशश्चेति पाठः समुचितो भाति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

दन्तक्षतभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

केशग्रहदय भेदाः ।

तरङ्गरङ्गः ३



कामावतंसः ४

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रस्थानकाले स्मृतिहेतुभूता तत्कोलचर्वं प्रवदन्ति विज्ञाः ३६

अथ केशग्रहणोद्देशः—

स्निग्धा घनाः कुञ्चितनीलवर्णाः
केशाः प्रशस्तास्तरुणीजनानाम् ॥
प्रेमप्रवृद्ध्यै विधिनैव मन्दं
ग्राह्या जनैश्चुम्बनदानकाले ॥ ३७ ॥

चिकुरान् परिगृह्य चुम्बति करयुग्मेन पतिः प्रियां यदि ॥
समहस्तकमित्यथैकतो यदि हस्तेन तरङ्गरङ्गकम् ॥३८॥
परिवेष्ट्य करेण कुन्तलान्मदनार्त्तो यदि धारयेत् प्रियाम् ॥
रतिकेलिकलापकोविदाः कथयन्तीति भुजङ्गवल्लिकम् ।३९।
कर्णप्रदेशस्थकचान् विगृह्य परस्परं चुम्बति यत्र नारी ॥
पतिश्च रागात्सुरतावतारे कामावतंसः स कचग्रहः स्यात्४०
इति प्रदिष्टाः कतिचित्प्रसिद्धाः क्रमान्मया बाह्यरतिप्रकाराः।
प्रसिद्ध्यभावाद्बहुशोऽपरे ते न दर्शिता विस्तरशङ्कया च॥४१॥

इति श्रीलाडखानविनोदाय महाकविकल्याणमल्ल-
विरचिते अनङ्गरङ्गे बाह्यसम्भोगनिरूपणं
नाम नवमं स्थलम् ।

१ अयं विषयो विशिष्य कामसूत्रादौ न दृश्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथ सुरतभेदा निरूप्यन्ते—

सौत्म्यानुरूपान् प्रविधाय पूर्वं विज्ञः पुमान् बाह्यरतोपचारान्।
विधिश्लथीभूतवराङ्गदेशां भजेत कान्तां स्मरकेलिरङ्गे॥ १॥
दृढापि नारी श्लथतामुपैति प्रसारणादूरुयुगस्य सद्यः।
अपि श्लथा संयमितोरुयुग्मा गच्छेद्दृढत्वं सुरतप्रयोगे॥ २॥
उत्तानकं तिर्यगथासिताख्यं स्थितं तथैवानतकं रतज्ञैः।
पञ्चप्रकारं सुरतं प्रदिष्टं तस्य प्रभेदान् क्रमतो ब्रवीमि॥ ३॥

तत्रादावुत्तानबन्धाः—

निधाय पादौ रमणांसयो-
श्चेदुत्तानसुप्ता रमते पुरन्ध्री॥
रतिप्रबन्धं समपादसंज्ञं
प्रोचुस्तदा भोगविधानदक्षाः॥ ४॥
उत्तानितायाः स्मरमन्दिरे यः
स्थितस्तदूरुद्वयमुत्प्रगृह्य।
संस्थाप्य बाह्यं कटितो रमेत
कान्तस्तदा स्यात्किल नागराख्यः॥ ५॥

---

१ सात्म्यानुरूपान्, देश-प्रकृत्यादिसात्म्यानुकूलान्। साम्यानुरूपान् इत्यपि पाठः।

२ रतिरहस्ये-'उत्तानितयोषित एव भवेदुपविष्टनरोरुगमूरुयुगम्। तद्ग्राम्यमथास्य बहिः कटितो यदि याति तदा किल नागरकम्॥ (सुरताधिकारे श्लो०१५) इत्युक्तस्य ग्राम्यस्यैवं नामान्तरमिदं भवेत्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १७)

सुरतचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १८)

उत्तानकसुरतबन्धभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

स्त्रियोऽङ्घ्रिमेकं विनिधाय भूमा-
वन्यं स्वमौलौ निजपाणियुग्मम् ।
पृथ्व्यां समाधाय रमेत भर्त्ता
त्रैविक्रमाख्यं[1] करणं तदा स्यात् ॥ ६ ॥
तल्पप्रसुप्ता निजपादयुग्मा-
वूर्ध्वं विधत्ते रमणी कराभ्याम् ॥
स्तनौ गृहीत्वाऽथ भजेत कान्तो
बन्धस्तदा व्योमपदाख्य[2] उक्तः ॥ ७ ॥
कान्तोरुयुग्मान्तरगः स्वहस्तौ
निधाय भूमौ रमते पतिश्चेत् ।
बन्धस्तदोक्तः स्मरचक्रनामा[3]
प्रेष्ठः सदा कामिजनस्य लोके ॥ ८ ॥
नारी स्वपादौ दयितस्य वक्षः-
स्थितौ समालिङ्ग्य करद्वयेन ।
किञ्चिन्नतोरू रमते तदासौ
प्रोक्तो मुनीन्द्रैरवतारिताख्यः[4] ॥ ९ ॥

---

१ शूलाचितकस्येदं नामान्तरम् । तथा च वात्स्यायनः 'एकः शिरसं उपरि गच्छेत् द्वितीयः प्रसारित इति शूलाचितकमाभ्यासिकम् । इति । (अ०२ अध्या ०६ प्र०७ सू० २७)

२ कामसूत्रे–"शिरो विनिपात्योर्ध्वं जघनमुत्फुल्लकम् (अ० २ अध्या० ६ प्र० ७ सू० ८) इत्युक्तस्य उत्फुल्लकस्येदं नामान्तरम् ।

३ कामसूत्रादौ न दृश्यते । ४ अयमपि कामसूत्रादौ न दृश्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

उत्तानितोरुद्वयमध्यगामी
दृढं समालिङ्ग्य भजेत यत्र ।
कान्तो विलासिप्रिय एष बन्धः
सौम्याख्य उक्तः कविभिः पुराणैः ॥ १० ॥
ऊरुद्वयं वक्रमुदञ्चितं च
कृत्वाम्बुजाक्षी भजते पतिं चेत् ।
आनन्दकर्त्ता तरुणीजनानां
बन्धोऽयमुक्तः किल जम्भिताख्यः ॥ ११ ॥
कान्तोरुयुग्मं परिवर्तितं चे-
न्निपीड्य कामाकुलचित्तवृत्तिः ।
रमेत भर्त्ता यदि वेष्टिताख्यं
तमेव बन्धं मुनयो वदन्ति ॥ १२ ॥
स्कन्धप्रदेशे विनिधाय जङ्घा-
मेकां स्त्रियोऽन्यामथ संविदार्य ।
अधो विनीय प्रबलां रमेत
भर्त्ता यदा वेणुविदारितं तत् ॥ १३ ॥
विलासिनीं संहतमूरुयुग्मं
कृत्वोर्ध्वमालिङ्ग्य भजेत भर्त्ता ।
उद्गमकः स्यात्प्रमदाङ्घ्रियुग्मे

१ कामसूत्रादौ न दृश्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

(चित्र संख्या १९)

तिर्यग्बन्धसुरतस्य भेदाः ।

कर्कटतिर्यग्बन्धः ३



(चित्र संख्या २०)

आसितबन्धभेदचक्रम् ।



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

कान्तोरसिस्थे स्फुटनं प्रदिष्टम् ॥ १४ ॥

अथ तिर्यग्बन्धाः—

कान्ताङ्घ्रिमेकं हृदये स्वकीये निधाय भर्त्ता शयने द्वितीयम्।
कुर्याद्रतिं चेदिति वीणकाख्यः प्रौढाङ्गनायाः परिकल्पनीयः॥
पार्श्वप्रसुप्तप्रमदोपरिस्थः कान्तः समालिङ्ग्य रतिं करोति॥
यत्र प्रदिष्टो मुनिभिःपुराणैर्बन्धस्तदा संपुटनामधेयः॥१६॥
यद्यङ्गनाकुञ्चितपादयुग्मं स्वनाभिदेशे परिकल्प्य भर्त्ता ।
रतिं प्रकुर्यादिति कर्कटाख्यं तदा कवीन्द्रैः करणं प्रदिष्टम् १७

अथोपविष्टबन्धाः—

प्रेङ्खाविलासं प्रसभं वहन्त्या विपर्ययाज्जङ्घयुगस्य नार्याः।
पद्मासनं स्यादथ चैकजङ्घाविपर्ययात्तूपपदं प्रदिष्टम् १८॥

स्वजानुयुग्मान्तरनिर्गतौ चेद्
भुजौ स्वकण्ठे विनयेन्मृगाक्षी ।
कान्तोऽपि कृत्वेति विधिं प्रगच्छे-
त्तदा बुधैर्बन्धुरिताख्यमुक्तम् ॥ १९ ॥

उक्तप्रकारौ यदि दम्पती स्वभुजौ तु कृत्वा निजकूर्परस्थौ॥
स्वैरं रमेते करणं प्रदिष्टं तदा कवीन्द्रैः फणिपाशसंज्ञम् २०

---

१ अथासितबन्धा इति पाठः समीचीनः।

२ रतिहस्ये तु 'जङ्घायुगलस्य विपर्ययतः पद्मासनमुक्तमिदं युवतेः। जङ्घैकविपर्ययतस्तु भवेदिदमेव तदर्धपदोपपदम् ॥' इति अर्धपद्मासनत्वेनोक्तम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

निधाय जङ्घायुगलं युवत्याः स्वकीययोः कूर्परयोरथास्याः।
कण्ठे स्वबाहू परिणीय गच्छेत्पतिस्तदा संयमनाख्यमेतत्२१
मुखे मुखं बाहुयुगे स्वबाहुं जङ्घाद्वये जङ्घयुगं निवेश्य।
गच्छेत्पतिश्चेदिति कौर्मकं स्यादूर्ध्वोरुयुग्मं परिवर्त्तिताख्यम्॥
स्थितां स्त्रियं कुञ्चितपादयुग्मां तथैव भर्त्ता कृततिर्यगङ्गः।
भजेत चेत्कामकलाविदग्धो बन्धं तदा युग्मपदं वदन्ति२३
विलासिनीकूर्परमध्यवर्त्ती कटिं स्वकीयां भ्रमयेन्मुहुश्चेत्।
भजेत भर्त्तेति विमर्दितं स्यात्तन्मार्कटं संमुखसङ्गमेन।२४।

अथ स्थितबन्धाः—

सम्वेष्टयित्वा निजकूर्परेण जान्वङ्गनाया अवलम्ब्य कण्ठम्।
रतिं प्रकुर्यादिति कूर्पराख्यो बन्धःप्रदिष्टः स च जानुपूर्वः२५
उक्तप्रकारे करणे यदैकः पादो भवेदूर्ध्वगतोऽङ्गनायाः।
तदा प्रदिष्टो हरिविक्रमाख्यो बन्धः प्रियोऽयं तरुणीजनानाम्
कण्ठं भुजाभ्यामवलम्ब्यभर्त्तुःश्रोणिं निजोर्वोर्युगलेन गाढम्।
संवेष्टय कुर्याद्रतमङ्गना चेदुक्तःकवीन्द्रैरिति कीर्त्तिबन्धः२७

अथ व्यानतबन्धाः—

विन्यस्तपाण्यङ्घ्रियुगा धरण्यामधोमुखी धेनुवदग्रसंस्था।
स्त्री स्यादथास्याःकटिदेशवर्त्ती भर्त्ता भजेद्धेनुकमेतदुक्तम्॥

१ अयं कामसूत्रे रतिरहस्ये च नास्ति।
२ आनतबन्धा इति समीचीनः पाठः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अधोमुखीं मस्तकदोः कुचास्यैर्भुवं गतां क्रामति यत्र नारीम्।
करीत्र भर्त्ता रतिलोलचित्तस्तदैभसंज्ञं करणं प्रदिष्टम्।२९।
ऐणसौकरकगार्दभादिकान्यप्रयोजकतयात्र भूरिशः ।
अप्रसिद्धकरणानि नोमया दर्शितान्यतिविनिन्दितानि च ३०

अथ पुरुषायितबन्धाः—

जातश्रमं वीक्ष्य पतिं पुरन्ध्री स्वेच्छात एवाथ रतेष्वतृप्ता।
कन्दर्पवेगाकुलिता नितान्तं कुर्वीत तुष्ट्यै पुरुषायितं सा ३१
उत्तानसुप्तं दयितं भुजाभ्यामालिङ्ग्य लिङ्गं विनिवेश्य योनौ।
भजेन्नितम्बं परिचालयन्ती नारी तदा स्याद्विपरीतबन्धः ३२
सुप्तस्य पुंसोजघनोपरिस्था सम्भ्रामयन्त्यङ्घ्रियुगंविकुञ्चितम्
चक्राकृतिः स्त्री नरवद्विचेष्टते तद्भ्रामराख्यं करणं समीरितम्
प्रेङ्खविभ्रमवती स्मरयन्त्रे भर्त्तृलिङ्गमुपधाय पुरन्ध्री ।
भ्रामयेत्कटिमनङ्गविलोला स्यात्तदा करणमुत्कलिताख्यम् ॥
विपरीतरते ससीत्कृता दरहासातिमनोरमानना ।
कितवाद्य वशं गतोऽसि मे स्मरयुद्धे विजितोऽसिचाप्यलम् ॥
इति मञ्जु रटन्त्यथाकुला सकचाकर्षणचुम्बिताधरा ।
श्रममीलितचारुलोचना द्रवतां याति तदा विलासिनी ३६॥
श्लथदेहलतां समूर्च्छनां दरसम्मीलितलोचनोत्पलाम् ।
समवेक्ष्य नितान्तनिःसहामवगच्छेदबलां द्रुतामिति॥३७॥

१ इदमेव कामसूत्रे रतिरहस्ये च 'प्रेङ्खोलितम्' इत्युक्तम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

करिणीं हरिणीं च गर्भिणीं नवसूतामृतुयोगिनीं कृशाम् ।
ज्वरितां च कुमारिकां रते विपरीते परिवर्जयेत्सुधीः ॥३८॥

ऐणं[1] गार्द्दभकं चैव शौनं सैरिभकं तथा ।
कामकेलिकलाविज्ञः प्रायेणैवं प्रकल्पयेत् ॥३९॥

सुरतेन यथोक्तेन तृप्तिं चेन्नाङ्गना व्रजेत् ।
कुर्याद्[2]द्यात्तु पुरुषश्चेष्टां तत्पुरुषायितम् ॥ ४० ॥

असमाप्तसुखा कान्तं हन्ति हस्तं धुनोति च ।
उत्थितुं न ददात्येव विधत्ते वा पतिक्रियाम् ॥४१॥

कन्यकां हरिणीं स्थूलां नवपुष्पां सुदुर्बलाम् ।
गुर्विणीं नवसूतां वा न युञ्ज्यात्पुरुषायिते ॥४२॥

चारुयौवनसम्पन्ना तन्वी श्रमविवर्जिता ।
जितव्रीडानुरक्ता च शस्ता नारी नरायिते ॥४३॥

विलोक्य श्रमयुक्तां तां पातयेच्छयने सुधीः ।
सम्पुटं घटयेच्चैव विसृष्टिसमये ततः ॥ ४४ ॥

मुखस्वजघनाश्लेषः[3] सीत्कारो व्रीतलज्जता ।
हिङ्कारः श्वसितं नार्य्याः सुखसान्निध्यसूचकम् ॥४५॥

मूर्छना मिलनं चाक्ष्णोश्च्युतिकालस्य लक्षणम् ॥

---

१ इत आरभ्य 'नोभावतां नो धनम्' इत्यन्तः पाठः पुस्तकान्तरे नास्ति । पुनरुक्तकल्पतयाऽधिको भाति ।

२ कर्तुमिति पाठः समीचीनो भवेत् ।

३ मुखे स्वेदो घनाश्लेष इति समीचीनो भवेत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सर्वमेतत्परिज्ञाय साधयेत्सुसुखं ततः ॥ ४६ ॥
अङ्गे स्वेदः श्लथत्वं च केशवस्त्रादिसंवृतिः ।
जाते च्युतिसुखे नार्य्या विरामेच्छा च जायते॥४७॥
अन्यासक्तमनाश्चिरं नरवरो रामां रतेः सत्वरां
ज्ञात्वा तन्मनसोदयं क्षणमथो मन्दं समान्दोलयन्॥
अन्ते जातसुखामवेत्य विसृजेद्बीजं निजं तत्पतिः
तिष्ठेत्तां परिरभ्य भावकथनैर्नोदेति यावन्मदः ४८॥
इत्थं याऽतिहिसौख्यहेतुकमिति वश्यं गता कामिनी
सा यावन्मरणं निजैर्धनजनप्राणैर्न तं मुञ्चति ॥
यस्त्वेवं सुखसाधनैकनिपुणो वश्याय चापेक्षते
नो मन्त्रं न च भेषजं न च हुतं नो भावतां नो धनम्॥४९॥

अथ करताडनसीत्कृतोद्देशाः—

कामयुद्धेऽङ्गयुग्मं स्यात्करताडनसीत्कृते ॥
तत्ताडनं चतुर्धोक्तं सीत्कृतं पञ्चधा स्मृतम् ॥ ५० ॥
प्रसृतेनाथ हस्तेन मुष्टिना समपाणिना ॥
ताडनं स्याच्चतुर्द्धैवं तस्य स्थानानि सम्ब्रुवे ॥ ५१ ॥
पार्श्वे गुह्ये समतलं मुष्टिं पृष्ठेऽथ मूर्द्धनि ॥
फणाकारं प्रसृतकं युञ्ज्यादधृद्यपहस्तकम् ॥ ५२ ॥

अथ ताडनभेदाः—

विपरीतरते यदाऽङ्गना हृदि मुष्ट्या परिताडयेत्पतिम् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

करघातनकं तदा बुधैरिति सन्तानितसंज्ञमुच्यते॥५३॥

विस्तीर्णहस्तेन रतौ यदा स्त्री
हन्यात्पतिं स्यात्सपताकसंज्ञम् ।
अङ्गुष्ठकेनैव कृतप्रहारो
विज्ञैः स उक्तः खलु बिन्दुमालः ॥ ५४ ॥

साङ्गुष्ठमध्याङ्गुलिकाप्रहारं शनैःपुरन्ध्री कुरुतेऽतिरागात्।
यद्येष उक्तः कविभिः पुराणैरानन्दकृत्कुण्डलनामधेयः५५॥

अथ सीत्कृतभेदांश्च पञ्चैव क्रमतो ब्रुवे ॥
हिङ्कृतं स्तनितं सीत्कृतोत्कृते फूत्कृतं तथा ॥५६॥
उच्चारो मुखनासाभ्यां हिङ्कृतस्याभिजायते ॥
स्तनितं मेघगम्भीरघोषवत्तदिदं स्मृतम् ॥५७॥
सीत्कृतं तत्तु भुजगोच्छ्वासवत्स्यादथोत्कृतम् ॥
वेणुविस्फोटनाघोषतुल्यं स्यादथ फूत्कृतम् ॥५८॥
मेघबिन्दुर्यथा तोये निपतेत्तद्रवाकृति ॥
सीत्कृतस्येति पञ्चैव क्रमाद्भेदाः समीरिताः ॥५९॥

लावकोकिलकपोतहंसिकानीलकण्ठरुतसन्निभान् क्रमात् ।
सन्दधाति किल हिङ्कृतादिकांश्चित्रभोगसमये विलासिनी६०
सुरते दशनच्छदो यदि प्रमदायाः परिखण्ड्यते भृशम् ॥
दयितेन तदातिरागकृत्क्रियते सीत्कृतमञ्जसा तया ॥६१॥

१ श्रमात् इति लाहोरमुद्रितपुस्तके पाठः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अथाष्टनायिकालक्षणानि—

निखिलसुरतचिह्नैरङ्किताङ्गः सपत्न्या
अरुणकलुषनेत्रो निद्रया जीवितेशः ॥
सभयमधुरवाक्यः प्रातरभ्येति यस्याः
कथयति भरतस्तां खण्डिताख्यां पुरन्ध्रीम् ॥६२॥

वनिता शुभवासवेश्मनि मृदुशय्यामधिवासिनी निशि ॥
पतिमार्गचिरार्पितेक्षणा कथिता वासकसज्जिका बुधैः॥६३॥

सागस्तया चरणगं दयितं प्रचण्डै-
र्वाक्यैर्निरस्य बहुकोपत एव पश्चात् ॥
सञ्जायते विरहतापविलापदीना
या तां वदन्ति कलहान्तरितां कवीन्द्राः ॥६४॥

मदनाकुलितातिनिस्त्रपा कृतभूषा निशि गूढचारिणी ॥
सुरताय परालये व्रजेत्कवयस्तामभिसारिकां जगुः॥६५॥

प्रियतममुपनेतुं प्रेषयित्वैव दूतीं
स्वयमतिरतिलोला याति सङ्केतदेशम् ॥
तदनु पतिविहीनामागतां वीक्ष्य तां या
वहति बहुलतापं सोच्यते विप्रलब्धा॥६६॥

दयिते परदेशसंस्थिते शशिपङ्केरुहचन्दनादिभिः ॥
परितप्यत एव यद्वपुः कथिता सा कविभिर्वियोगिनी॥६७॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

वैराग्यवान् सकलकेलिकलाकलासु[1]
कान्तो जहाति न सकाशमनङ्गलौल्यात् ॥
यस्याः स्त्रियाः सुरतसौख्यविचार्चिता[2] सा
स्वाधीनपूर्वपतिकेति बुधैः प्रदिष्टा ॥ ६८ ॥
विविधकुसुममालाभूषिताङ्गी मनोज्ञा
सुरतरसविलोला सानुरागा स्वकान्ते ॥
निवसति चटुलाक्षी वासगेहे चिरं या
वरकविभिरिहोक्ता सा किलोत्कण्ठितेति ॥६९॥
वासकसज्जा समुत्कण्ठा स्वाधीनभर्तृका तथा ॥
कलहान्तरिता चापि विप्रलब्धाभिसारिका ॥
खण्डिता प्रोषिता चैव नायिकाश्चाष्टधा स्मृताः॥७०॥

इत्यष्टौनायिकाः ॥

सुविदितपरमार्थः कामशास्त्रस्य विद्वान्
विविधरतिविनोदैः कामिनीनां मनांसि ॥
अनुदिनमनुरागाद्रञ्जयेद्यः सलीलं
कलमविकलमेवं[3] प्राप्नुयान्मानवः सः ॥७१॥
यावच्छङ्करमौलिगा[4] सुरनदी गौरी तदर्द्धाङ्गगा[5]

१ सकलकार्यककलालापे इति लाहोरमु० पु० पाठः ।
२ सकलसौख्यसमान्विता इति ला० मु० पु० पाठः ।
३ सुखमविक० इति लाहोरमु० पु० पाठः ।
४ शेखरे इति ला० मु० पाठः ।
५ तदर्धासने इति ला० मु० पाठः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

यावत्प्रेमवती पयोधितनया वैकुण्ठनाथे हरौ ॥
वेदाभ्यासरतो विरञ्चिरपि भूर्यावद्दिनेशः शशी
भूयात्तावदनङ्गरङ्गक इति प्रीत्यै सदा कामिनाम्[2]॥७२॥

इति श्रीमल्लाडखानविनोदाय महाकविकल्या-
णमल्लविरचितेऽनङ्गरङ्गे सुरतादिभेद-
निरूपणं नाम दशमं स्थलं
समाप्तम् ॥ १० ॥

समाप्तोऽयं ग्रन्थः ।

---

१ अत्र यावत् भूः, यावत् दिनेशः, यावत् शशी इति योजना ।
२ इतः परम्—"कामगायत्री । ॐमनोभवाय विद्महे पञ्चबाणाय धीमहि । तन्नः कामः प्रचोदयात् ।" इत्यधिकं ला० मु० पुस्तके दृश्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri



CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage; Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage Digitization: Sarayu Trust/eGangotri

. ॥ ।सिसंस्कृतग्रन्थमा॰ समाख्या

काशीसंस्कृतसीरीज़ ।

Raja Dyanand

अस्यां काशी—संस्कृतग्रन्थमालायां विभागशः प्रकाशिता भ
ति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ता
स्कृतग्रन्थाः काशिराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यै
विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्य
णानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नि
रन्तरविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं प
विं॰ मुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथ
दातव्यो भवेत् ।

तत्र मुद्रित ग्रन्थनामानि । रु. आ. प

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) ० १—८-
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृता-
ऽन्वयार्थबोधिनीटीकासहितम् । (वेदान्तः १) १०—०-
३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभा-
ष्योपस्काराभ्यां समन्वितम् । (वैशेषिक १) ३—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्य
कृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् (वैदिक १) ०—६-
५ लघुशब्देन्दुशेखरः सटीकः तत्पुरुष-
समासादारभ्य कृदन्तान्तः (व्याकरण १) १०—०-
६ कारिकावली मुक्ता॰ दिन॰ राम॰
शब्दखण्डसहिता तथा "गुणानिरूपण"-
दिनकरीय महामहोपाध्याय पं॰ लक्ष्मण-
शास्त्रीव्याख्या सहिता । (न्याय १) १०—०-
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृत वार्तिकटीकया-तत्त्व
चन्द्रिका समवेत विवरणेन च समन्वितम् । (वेदान्त२) ०—८
८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वर
पाण्डेयनिर्मितः । (काव्य १) ०—८-
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्र१) ०-१२-

पत्रादिप्रेषणस्थानम्

हरिदासगुप्त एण्ड सन्स,
मालिक, चौखम्बा संस्कृत सीरीज आफीस
विद्याविलासप्रेस गोपालमंदिरलेन
बनारससिटी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote. Digitized by eGangotri

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funded by K.S. Pattiya Heritage Digitization Sarayu Trust/eGangotri

CC-0. Bhagavad Ramanuja National Research Institute (Melukote) Collection.